दिल्लीविश्वविद्यालयस्थस्य
इन्द्रप्रस्थमहिलामहाविद्यालयस्य
प्राचार्यायाः वार्षिकविवरणम्
२०२३

प्राचार्यायाः वार्षिकविवरणम् 2023

विषयानुक्रमणी

1. प्राचार्यायाः भाषणम् - आमुखम् 1

2. प्रशस्तिपत्रम् 4

3. प्राध्यापकानाम् विशेषाः उपलब्धयः 5

4. शिक्षकेतराणां कर्मचारीणां विशेषाः उपलब्धयः 7

5. छात्राणां उपलब्धयः 7

6. विभागीयशैक्षिकोपक्रमाः 9

7. राष्ट्रियसेवायोजना (NSS) 11

8. राष्ट्रियछात्रसेना (NCC) 13

9. व्यावसायिकमार्गदर्शनं तथा नियुक्तिकक्षः 14

10. समानावसरकक्षः 16

11. सक्षमताविभागः 17

12. गांधी-अध्ययनकेन्द्रम् 18

13. शैक्षिक: सांस्कृतिक - अनुबन्ध: 19

  1. `**अनन्ता**` - विज्ञानसभा

  2. पाठ्येतराः गतिविधयः

14. क्रीडा 24

15. निवृत्तयः 26

16. श्रद्धाञ्जलिः 26

प्राचार्यायाः भाषणम् - आमुखम्

अयि मान्याः !

प्रमुखातिथयः भारतस्य मान्याः राष्ट्रपतिवर्याः, दिल्ली विश्वविद्यालयस्य मान्याः कुलाधिपतयः श्री. जगदीपः धनकरवर्याः, कुलपतयः मान्याः योगेशः सिंहवर्याः, महाविद्यालस्य प्रशासकीयसमितेः मान्याः अध्यक्षाः श्री. आलोकः श्रीरामवर्याः, प्रशासकीयसमितेः सदस्याः, सहकर्मिणः, मित्राणि, छात्राश्च । अद्य इन्द्रप्रस्थमहिलामहाविद्यालयस्य शतकोत्सवे भवतां सर्वेषां सहर्षं स्वागतं करोमि । अत्र भवताम् उपस्थित्यर्थम्, अस्मै अतिविशिष्टाय उत्सवाय कृतस्य योगदानस्य च कृते कार्तज्ञं निवेदयन्ती अहम् अत्यन्तं गौरवम् अनुभवामि ।

अत्रास्मिन् उत्सवविशेषेण सह इन्द्रप्रस्थमहिलामविद्यालयः शिक्षायाः माध्यमेन महिलासशक्तिकरणस्य, छात्रासु देशभक्तेः बीजावापस्य, आत्मविश्वासनिर्माणस्य, स्वतंत्रतायाः, समर्पणस्य, छात्राभिः विविधक्षेत्रेषु कृतस्य अभूतपूर्वस्य योअगदानस्यापि शतकोत्सवम् आचरति । इन्द्रप्रस्थमहिलामाहाविद्यालयस्य दैदिप्यमानायाः उत्कृष्टतासम्पादनस्य परम्परायाः अवलोकनार्थम् अहं पुनरेकवारं भवतां महाविद्यालये शतकोत्सवारम्भमहोत्सवे सर्वेषां स्वागतं व्याहरामि । 18 जुलै, 1951 तमे दिने लब्धजन्मानः, पश्चिमबङ्गालस्य पूर्वराज्यपालान्, जगदीपः धनकरवर्यान् अस्मिन् समारोहे प्रमुखातिथित्वेन लब्ध्वा वयं गौरवम् अनुभवामः । विधिविषयाणां सामाजिकविषयाणां च श्रीमतां विशिष्टः अनुभवः वर्तते । लोकसभायां राजस्थानसमित्यां च एते सदस्यत्वेन कार्यं कृतवन्तः । भारतीयविधिसंस्थायाः एते आजीवनसदस्याः । Indian Council of Arbitration, ICC Court of Arbitration इत्यादीनां संस्थानामपि एते प्रमुखसदस्यत्वेन कार्यं कृतवन्तः । भवताम् उपशितत्या वयं प्रमुदिताः ।

दिल्लीविश्वविद्यालयस्य त्रयोविंशतितमाः कुलपतयः मान्याः प्रोफे. योगेशः सिंहवर्याः, दिल्लीतांत्रिकविश्वविद्यालयस्य पूर्वकुलपतयः, उचविद्याविभूषितः ३५ तमे वयसि गुरुगोविंदसिंह-इन्द्रप्रस्थविद्यालये, Information and Communication Technology इति विषयस्य प्रोफेसरपदम् अलङ्कृतवन्तः आसन् । विविधासु उचविद्यासम्बन्धितासु शाखासु सञ्चालकपदं अधिरूढाः इमे अद्य महाविद्यालयं समागत्य मञ्चं भूषयन्ति इति अस्माकं भाग्योदर्कदर्शकम् ।

महाविद्यालस्यशतकोत्सवे आनन्देन उद्घोषयितुम् इच्छामि यत् अस्मिन् वर्षे आहत्य १२३ प्राध्यापकानां विविधेषु विभागेषु नियुक्तिकरणस्य महत्त्वपूर्णम् ऐतिहासिकं च कार्यम् अस्मिन् वर्षे जातम् । तदर्थम् अहं शिक्षामन्त्रालयस्य, विश्वविद्यालयानुदानायोगस्य, दिल्लीविश्वविद्यालयस्य मान्यः कुलपतिः, विविधविभागाणां सङ्कायाध्यक्षाः, महाविद्यालयस्य प्रशासकीयसमितेः अधिकारिणः, च धन्यवादार्हाः । अस्याः प्रक्रियायाः पूर्तेः कृते श्रेयोभाजाः सर्वे कर्मचारिणः कृतज्ञतया अभिवन्दनीयाः ।

जागतिकमहिलादिने १५ मार्चदिने महिलासशक्तिकरणध्येयम् आधृत्य आयोजिते `अस्तित्व`नामके कार्यक्रमे ले.कर्नल् रेणुका हरणेवर्या भारतीयसेनायां सेवावसराणां विषये छात्राः सम्बोधितवती । २० मार्चदिने १४ USIEF विदुषां गणस्य माध्यमेन Fulbright-Nehru International Education संस्थया सह परिषद् आयोजिता । अस्य कार्यक्रमस्य अङ्गत्वेन छात्रैः संचालिताः विशिष्टाः कार्यक्रमाः, शैक्षिकयात्रा, collaborative research विषये प्राध्यापकैः सह चर्चासत्राणि च आयोजितानि । जागतिकजलदिनस्य उपलक्ष्ये ‘Sixth Colloquy: Ganga Samvad’ इति नामकः जलशक्तिमन्त्रालयद्वारा प्रायोजितः कार्यक्रमः महाविद्यालयपरिसरे अयोजितः । `श्रुतिनामकस्य`वार्षिकसांस्कृतिकमहोत्सवस्य आयोजनं २७ मार्चे दिने जातम् । तत्र **Times Now** संस्थायाः प्रसिद्धा

प्रमुखसम्पादिका `श्रीमती **नाविका कुमार**वर्या` उपस्थिता आसीत् । १६ मार्चदिने महाविद्यालयस्य प्राचार्या तया उच्चशिक्षाक्षेत्रे कृतस्य अभूतपूर्वस्य योगदानस्य कृते Slovenia देशस्य राजदूतया **Ms. Mateja Vodeb Ghosh** महोदयया प्रशस्तिपत्रेण सम्मनिता । जागतिकपर्यावरणदिने ५ जूनदिनाङ्के महाविद्यालयेन 'National Education and Awareness Award' नामकः पुरस्कारः प्राप्तः ।

`हर घर ध्यान` इति उपक्रमस्य अङ्गतया २३ जूनदिनाङ्के ध्यानसत्रं सञ्चालितम् । तत्र कु. लालिमा अनेजा डांगवर्या मार्गदर्शनं कृतवती । `स्वच्छभारताभियानान्तर्गतं माहविद्यालयपरिसरे दि.३ जुलै दिने अवकरव्यवस्थापनाय अभियानं सञ्चालितम् । १५ अगस्तदिने स्वतंत्रता दिनस्य आचरणं महता उल्लासेन सर्वसहभागितया च अभूत् । १६-२२ अगस्तदिनेषु `मेरी माटी मेरा देश` इति अभियानान्तर्गततया `वाताटोड्डयनस्य`कार्यशालाअ आयोजिता आसीत् । रक्षाबन्धनदिने महाविद्यालयस्य ३० छात्राः दिल्लीस्थे **Rajputana Rifles regiment** इत्यत्र उपस्थितान् अग्निवीरान् रक्षासूत्रं बद्ध्वा उत्सवम् आचरितवन्तः । ICCR संस्थयाः सहयोगेन कु. निलाक्षि खांडकरवर्यायाः कथकनृत्यं ३१ अगस्तदिने आयोजितम् । ४ – ५ दिनयोः वैदिकगणीतकार्यशाला, पाणीनि-अष्टाध्यायीव्याख्यानम्, प्रथमविश्वयुद्धस्य नायकाः – इति व्याख्यानम् इ. कार्यक्रमाः आयोजिताः । तत्र श्री. रविकुमारः अय्यर, डा. चिवुकुला श्रीरामः प्रभुः, डा, वसुधा गुप्ता च मार्गदर्शनं कृतवन्तः । 'Bhartiya Army Calling' नामकः कार्यक्रमः १५ सप्टेम्बरदिने आयोजितः । तत्र ले.क. रञ्जनः गुप्ता सेनाविषयकं मार्गदर्शनं कृत्वा छात्राः प्रेरितवान् ।

'The Art of Storytelling in Bharatiya Cinema.' इति नामके कार्यक्रमे लोकसभासदस्यः मान्यः श्री. विश्वविजयेन्द्रप्रसादः उपस्थाय छात्रान् उपदिष्टवान् । `एक तारीख एक घण्टा` इति कार्यक्रमे ६० छात्राः ५० छात्राः च सम्मिल्य देहलीस्थे खैयबरपासस्थाने `सामाजिकसेवाम्` अकुर्वन् । ९ अक्तूबरदिने डा. अभिषेकः टण्डनमहोदयः Udhmodya Foundation संस्थायाः साहाय्येन आयोजिते Start-up Conclave नामके कार्यक्रमे मार्गदर्शनं कृतवान् । १६ अक्तूबरदिने `अमृतकलशयात्रा`नामकेन कार्यक्रममाध्यमेन हुतात्मनां स्मरणं कारितम् । तदा लोकसभामन्त्री श्री. मनोजः शर्मा उपस्थितः आसीत् । १७ अक्तूबरदिने NCC विभागस्य पुनर्नवीकरणकार्यक्रमे मेजरजनरल सञ्जय विश्वासराववर्यः (ADG, NCC, Delhi) मार्गदर्शनं कृतवान् । Developed India Mission- 1947 to 2047 नामके महत्त्वपूर्णकार्यक्रमे RedHat, USA संस्थायाः श्री. आशरः सैय्यदः ThinkStreet Technologies संस्थातः श्री. उदयः रघुनाथः बिरजे च मारगदर्शनं कृतवन्तौ । ३१ अक्तूबरदिने `खादि पे चर्चा` नामके कार्यक्रमे मान्यः विजयः गोयलवर्यः मार्गदर्शनं कृतवान् ।

सरदार वल्लभभाई पटेलवर्यस्य स्मृतौ आयोजिते कार्यक्रमे निमंन्त्रणं प्राप्य प्राध्यापकाः छात्राः च भारतसंसत्सदनस्य संविधानसदनम् उपस्थाय मार्गदर्शनं प्राप्तवन्तः । 'G-20 Academia-Cultural Indulgence: 50 Years of South Korea-Bharat Friendship' नामकस्य कार्यक्रमस्य आयोजनं ७ – ८ नवम्बरदिनयोः दिल्ली विश्वविद्यालयः , साऊथ कोरिया देशस्य संयुक्ततया अभवत् । तदा चर्चासत्रम्, भारत – कोरियन् भोज्योत्सवः, K-Pop Dance स्पर्धा चेति विविधाः कार्यक्रमाः आयोजिताः ।अस्मै आयोजनाय दिल्ली विश्वविद्यालयस्य कुलगुरोः प्रो. योगेशः सिंहवर्यस्य विशेषप्रशस्तिपत्रं महाविद्यालयस्य प्राचार्यायै प्राप्तम् **।'Viksit Bharat@2047: Voice of Youth'** अभियानस्य अन्तर्गततया अनेके कार्यक्रमाः महाविद्यालयेन सञ्चालिताः ।

उच्चशिक्षणदृष्ट्या छात्राभ्यः अवसरकल्पनाय भविष्यत्कालीनसम्भावनानां जागरणाय च इन्द्रप्रस्थमहिलामहाविद्यालयः केनया देशस्थयोः Maasai Mara University, Kenyatta University and University of Nairobi नामकयोः द्वयोः विश्वविद्यालययोः मध्ये **Memorandum of Understanding** (MoU) निर्माणम् अभवत्।

सानन्दम् उद्घोषयामो यत् अस्माकं माहाविद्यालयः **Nature Positive Universities** नामककक्ष्यायां प्रविष्टः इति। अयं विश्वस्तरीयः कश्चन विशिष्टः कार्यक्रमः यत्र **UN Environment Programme (UNEP)** , **University of Oxford** चेति संस्थाद्वयान्तर्गततया मार्गदर्शनं भवति । Nature Positive University नामककोटौ विराजमानेने अस्माकं महाविद्यालयेन ६५३ संख्यायुताः दिल्लीविश्वविद्यालयपरिवारे सर्वाधिकछात्राः पञ्जीकृताः सन्ति।

अस्माकं शैक्षणिक उच्चाङ्कस्थापनस्य परम्परायाः निर्वहणं कुर्वन्तः अस्माकं शिक्षकैः अद्यावधि पालिता अस्ति। अस्मिन् वर्षे ७५ प्राध्यापकैः शोधपत्राणि प्रकाशितानि । ९ प्राध्यापकाः पुस्तकानि विलिख्य प्रकाशितवन्तः । १८ प्राध्यापकाः पुस्तकेषु प्रकरणानि लिखितवन्तः। **ICSSR** and **JETREG** आदिभिः संस्थाभिः अनुदानितायां राष्ट्रीय – अन्ताराष्ट्रीयस्तरगतपरियोजनायां ५ प्राध्यापकाः सक्रियभागम् अवहन् । ५० प्राध्यापकाः तेषां अभिनवसंशोधनस्य निष्कर्षान् राष्ट्रीय – अन्ताराष्ट्रीयस्तरे प्रस्थापितवन्तः। ६० प्राध्यापकैः (FDPs and FIPs) शिक्षकपरिचर्याप्रशिक्षणानि प्राप्तवन्तः। यैः १० प्राध्यापकैः विद्यावारिधिपदवी प्राप्ता तेषां हार्दम् अभिनन्दनम्।

इन्द्रप्रस्थमहिलामहाविद्यालयस्य परम्पराम् अनुपालयन्तिभिः छात्राभिः अस्मिन् अपि वर्षे पारितोषिकाणि च प्राप्तानि। आहत्य ७० छात्राः अन्ताराष्ट्रीयराष्ट्रियपरिषत्सु, कार्यशालासु, कार्यक्रमेषु च उपस्थाय शोधपत्राणि, काव्यानि, ललितलेखान् प्रस्तुतवन्तः प्रकाशितवन्तः च। ४० छात्राः विश्वविद्यालयस्तरीयासु वादविवाद – प्रश्नमंजूषा-साहित्यिक – सांस्कृतिकस्पर्धासु भागं गृहीतवन्तः । राष्ट्रस्तरीयराज्यस्तरीयासु स्पर्धासु च १० छात्राः विभिन्नान् पारितोषिकान् अपि अर्जितवत्यः । १५ छात्राभिः उच्चस्थानानि अपि अधिगतानि । १२ छात्राः अन्ताराष्ट्रीयस्तरे राष्ट्रस्तरे च महाविद्यालस्य गौरवं वर्धितवन्तः। तेषु केषाञ्चन उल्लेखः अत्र क्रियते। कु. रिया सिन्हा राष्ट्रीयकराटेक्रीडायां सुवर्णपदकं प्राप्तवती। कु. आरुषी कोतवाल, राष्ट्रीयबुद्धिबलस्पर्धासु सुवर्णपदकं जीतवती । कु. अनन्या पाण्डेय, छत्तिसगढराज्यस्पर्धायां बैडमिण्टनस्पर्धायां प्रथमं स्थानम् अर्जितवती। कु . रान्या राणा अपि राज्यस्तरीयस्पर्धायां सुवर्णपदकं प्राप्तवती। प्राची तिवारी राष्ट्रीयसंस्कृतओलम्पियाडमध्ये सुवर्णपदकम् अर्जितवती । महाविद्यालयस्य राष्ट्रीयसेवायोजनायाः छात्रा कु. काशिका बजाज सप्तदशछात्रैः सह Delhi Contingent दिल्ली सेनायां MMPG महाविद्यालये फतेहाबादे प्रातिनिधित्वं कृतवती। राज्यशास्त्रविषयस्य छात्रा कु. शिवानी राज अन्ताराष्ट्रीयस्तरे Best Delegate at Becon Academy, Indonesia इत्यस्य प्रमाणपत्रं प्राप्तम्। अस्माकं गौरवं वर्धयन्ती सङ्गीतविभागस्य छात्रा कु. सपना अहिरवार with Visual Impairment दिल्लीविश्वविद्यालये तबला विषयं पठन्ती एकमेवा छात्रा अस्ति।

छात्राणां वैविध्यपुरस्कारपूर्वकम् अस्माकं प्रवेशानुसरणीपुरस्सरम् अस्मिन् वर्षे आहत्य 1416 छात्राणां पदवीशिक्षणे प्रवेशः जातः। १२३ छात्राः, १२ छात्राः च विविधेभ्यः देशेभ्यः प्रवेशिताः। सामाजिकोत्तरदायित्वं स्मरता महाविद्यालयेन अमिन् वर्षे ९० छात्राभ्यः निःशुल्कप्रवेशः ४०० छात्रेभ्यः च आंशिकशुल्केन प्रवेशः प्रदत्तः। छात्रावासे अपि १४ छात्रेभ्यः आंशिकशुल्केन प्रवेशः प्रदत्तः । ८० दिव्याङ्गछात्रेभ्यः अपि निःशुल्कप्रवेशः दत्तः । विविधाभ्यः संस्थाभ्यः प्रदत्तम् आर्थिकं साहाय्यं सकार्तज्ञं स्मरामः।

अत्यन्तप्रसन्नतया सगर्वम् इन्द्रप्रस्थस्य शतकोत्सवम् आलक्ष्य उत्कृष्टसाहित्यिककृतिभिः परिपुष्टायाः ``आरोह``नामिकायाः वार्षिकपत्रिकायाः विमोचनं कर्तुं प्रवृत्ताः । अस्य २०२३ तमस्य वर्षस्य शतकावृत्तेः विषयः 'Spectrum of Dreams: from *Amrit Kaal to Kartavya Kaal,*' स्वप्नानाम् इन्द्रधनुः – अमृतकालतः कर्त्तव्यकालपर्यन्तम् इति महता विचारेण देशस्य भविष्यत्कालदृष्ट्या छात्राणाम् उत्तरदायित्वस्य भावं जनयितुं निश्चितः ।

अस्माकं महाविद्यालयस्य छात्रैः शतसु वर्षेषु आयोजितेषु कार्यक्रमेषु प्रस्तुतानां कलानां, प्राप्तानां विशिष्टप्रोत्साहनानाम्, ऐतिहासिकयोगदानस्य च चित्राङ्कनं दर्शयन्तं Coffee Table Book इति विशिष्टं सचित्रपुस्तकं प्रकाशयितुम् उद्युक्ताः वयम् । महाविद्यालयस्य शतवर्षाणाम् इयं चित्रयात्रा नूनमेव दर्शकानां चक्षूंषि संतोषयिष्यति । १९०४ तमे वर्षे स्थापितायाः हिन्दूशिक्षाकन्यालयात् महाविद्यालयपर्यन्तम् जायमानानां विविधानां स्थित्यन्तराणां स्मरणं कारयन्ति इयं चित्रावली अद्यतनछात्राणां, प्राध्यापकाणां, शिक्षणेतरकर्मिणां च मनःसु संस्थाविषयकं गौरवं वर्धयिष्यति । भूतकाले स्वातंत्र्यार्थं कृतानां प्रतिज्ञानां, महत्त्वपूर्णानां निर्णयानां, साधितानां यशसां च प्रमाणीभूता इयं परम्परानुक्रमणी भविष्यद्विषये आश्वासयन्ती बहुमानं प्राप्स्यति इति आशास्महे ।

प्रशस्तिपत्रम्

इन्द्रप्रस्थमहिलामहाविद्यालयस्य मालाकारेभ्यः,सुरक्षाकर्मिभ्यः, उपहारगृहे कर्मरतेभ्यः तेषामनवरतयोगदानार्थम् इदम् प्रशस्तिपत्रम् ससम्मानं प्रदीयते ।

भवतां कर्तव्यपरायणता, संवेदनशीलता, निरन्तरपरिश्रमदानस्य क्षमतायाः कारणेन अयं महाविद्यालयः सुरक्षा, उद्यानं, स्वच्छता, उत्कृष्टखाद्यपेयानां क्षेत्रे प्रतिदिनं नवीन कीर्तिमानं स्थापयन्तः सन्ति ।

भवद्भिः कृतयस्य उल्लेखनीयस्य योगदानस्य कृते महाविद्यालयपरिवारः भवतां पुनश्च कृतज्ञतां अभिव्यनक्ति । भविष्यत्काले भवतां सहभागितायाः अपेक्षां करोति ।

अधोलिखितानि सहयोगीनां कर्मचारिणां नामानि सन्ति । -

मालाकाराः	**सुरक्षाकर्मिणः**	**स्वच्छताकर्मिणः**	**उपहारगृहस्य कर्मिणः**	**प्रकाशव्यवस्थाकर्मिणः**
राजेंद्रः मौर्यः	हीरालालः	कुमारी सुनीता	अशोकः अनेजा (उपहारगृहस्य स्वामी)	बनारसी
मन्नू खन्ना	गरीबदासः	राजू	गिरीशः	पप्पू
मोहनलालः	निर्मला	कमलः	जितेंद्रः (राजू)	विशालः
जिले सिंहः	गणेशः त्रिपाठी	हरेंद्रः	भानूप्रतापसिंहः	किरणः
ध्रुवराजः	किसनभानः दरी	प्रदीपकुमारः	प्रिंससिंहः	अर्चना
अहमद अली	देवेंद्रकुमारः मल्लः		रामखेलावनः	सोनिया
हासिम अली	सुरेशकुमारः		ईशा हक्क	सुनीता
हौसला	बासुदेवः		अनुराधा सिंह	गीता
राजेंद्रः	सोनी		रामकिशोरः	रोहितः
लोकेशः	दीपककुमारः		राजकुमारः टाटी	कविता

मोहित:	मोरवकुमार:		संजय:	सुनीता
	गजेंद्र: सिंजोह:		बुधिया ढाल:	राखी
	ममतेश:		अजूकुमार: ढाल:	मधु
	रेनू		सुशील:	दीपा
	बबिता		राजाराम:	बनारसी
	तरसेमकुमार:		गोपाल:	पप्पू
	घनश्याम:			विशाल:
	वृषभान:			
	भारत: सिंह:			
	मोनिका			
	मुनेशदेवी			

प्राध्यापकाणाम् उपलब्धयः –

इन्द्रप्रस्थमहिलामहाविद्यालयः अस्य प्रतिष्ठितानां प्राध्यापकाणाम् अस्य वर्षस्य विशेषशैक्षणिकोपलब्धीनां मौलिकयोगदानस्य च विवरणं कर्तुम् आनन्दमनुभवति।

अस्माकं प्राध्यापकानां समर्पणेन, नाविन्यपूर्णशैक्षिकप्रयोगैः, वैदुष्येण च तैः आवर्षं कृतस्य अभूतपूर्वस्य योगदानस्य कारणेन न केवलं अस्माकं महाविद्यालस्य अपि तु सामाजिकस्तरे अपि तैः स्वस्य नाम स्वर्णाक्षरैः अङ्कितं वर्तते।

इदं विवरणं नाम महाविद्यालस्य शिक्षकैः उत्कृष्टतासम्पादनाय निरन्तरतया कृतस्य गवेषणस्य निदेशनम् अस्ति। प्रचलितानां संशोधनानां रीतिमुल्लङ्घ्य परिवर्तितशिक्षणपद्धतिपर्यन्तम् अस्माकं प्राध्यापकैः सततपरिश्रमेण ज्ञानस्य कक्षाणां विस्तारं कृत्वा छात्राः उच्चाङ्कप्राप्त्यै प्रेरिताः सन्ति।

अस्मिन् विवरणे भवन्तः प्राध्यापकाणाम् उपलब्धीनां व्यापकदर्शनं कर्तुं शक्नुवन्ति। यथा प्रतिष्ठितशोधपत्रिकासु लेखप्रकाशनम्, स्वोपज्ञपुस्तकानि, परिषत्सु शोधपत्राणां प्रस्तुतिः, शिक्षकविकासकार्यक्रमेषु सहभागः, अभिविन्यासकार्यक्रमेषु सहभागः, पाठ्यचर्यापरिवृद्धिकार्यक्रमेषु सहभागः, वित्तीयानुदानानां प्राप्तिः, सामुदायिकसहभागितया कार्यक्रमाणाम् आयोजनम्, असामान्यपाठनाय मार्गदर्शनाय च प्राप्ता प्रशंसा इत्यादयः अत्र उल्लेखिताः।

अस्माकं प्राध्यापकाणां पर्वतोपमानाम् उपलब्धीनां कृते इन्द्रप्रस्थमहिलामहाविद्यालयः सर्वेषां हार्दं प्रशंसनं करोति। महाविद्यालयीयपरिसरे चिकीत्सकचिन्तनस्य, बौद्धिकजिज्ञासायाश्च वायुमण्डलस्य निर्मित्यै पोषणाय च उद्युक्तानां समेषां प्राध्यापकानां वयम् अभिनन्दनं कुर्मः।

विगते शैक्षणिकसत्रे (०९) नवप्राध्यापकैः बहूनि, विविधविषयान्वितानि च पुस्तकानि स्वसंशोधनेन, मौलिकचिन्तनेन च रचितानि।

अष्टादशप्राध्यापकाः (१८) स्वानुभवयोजनेन, विशेषाध्ययनेन च विविधशास्त्रोक्तग्रन्थेषु प्रकरणानि लिखितवन्तः।

एकपञ्चाशतैः (५१) प्राध्यापकैः विविधासु (६८) अष्टषष्टिः शैक्षणिकपत्रिकासु, शास्त्रसमीक्षणेन, चिकीत्सात्मकशैल्या च सप्रमाणं शोधपत्राणि प्रकाशितवन्तः।

पञ्चप्राध्यापकाः प्रभावात्मकसंशोधनयोजनासु कर्मनिरताः आसन् । तेषु ICSSR, Journalism Education Trauma and Research Group (JETREG)- International Project, SPARC इत्यादयः संस्थाः प्रधानाः । आन्तरशास्त्रीयक्षेत्राणाम् अन्वेषणम्, शैक्षणिकक्षेत्रे च महत्त्वपूर्णयोगदानं च कर्तुम् एतैः विशेषप्रयासाः कृताः ।

उपपञ्चाशतप्राध्यापकाः राष्ट्रियान्ताराष्ट्रियासु पत्रिकासु संशोधनसारगर्भितानि शोधपत्राणि प्रास्तुवन् ।

त्रिंशदधिकप्राध्यापकाः विविधपरिषत्सु, चर्चासत्रेषु, शैक्षणिकसंस्थानां परिचर्चसु च अतिथिव्याख्यातृत्वेन भागमवहन् ।

विंशत्यधिकप्राध्यापकाः संगोष्ठिसु, विविधकार्यशालासु च आध्यक्षम् अलङ्कुर्वन् । परिचर्चासमूहेषु मुख्यविचारकत्वेन भागमूढ्वा स्वकीयाध्यायनेन समाजे विद्वत्कुलेषु च विशिष्टस्थानं सम्पादितवन्तः ।

उपपञ्चत्रिंशत्प्राध्यापकाः पाठनकौशलविकासाय, शिक्षाशास्त्रसम्बद्धान् नवाचारान् ज्ञातुम्, सर्वाङ्गिणविकासावसरान् अवगन्तुं च शिक्षकविकासकार्यक्रमेषु भागमवहन् ।

पञ्चप्राध्यापकाः स्वव्यावसायिकविकासार्थं, ज्ञानस्य अद्यावधिकरणार्थं च शिक्षकपरिचर्याकार्यक्रमेषु सहभागितां दर्शयन् ।

त्रयोविंशतिः प्राध्यापकाः अत्यन्तसक्रियतया शिक्षकविकासकार्यक्रमेषु, तद्गतसत्रेषु, क्षमताविकाय भागमगृह्णन् ।

षष्टिः प्राध्यापकाः मानवसंसाधनविकासमन्त्रालयस्य विविधेषु उपक्रमेषु, शिक्षकप्रशिक्षणेषु, विशेषपाठशालानाम् उपक्रमेषु, संस्थागतसंमिलितकार्यक्रमेषु च भागं गृहित्वा स्वकीयविषयनैपुण्येन उपस्थितान् प्रेरितवन्तः ।

चर्तुविंशतिप्राध्यापकाः राष्ट्रियशिक्षानीतेः क्रियान्वयनाय विविधविश्वविद्यालयेषु नवीनपाठ्यक्रमनिर्माणे सक्रियतां दर्शितवन्तः ।

वहवः प्राध्यापकाः Amity University, University of Delhi, and Delhi Technical University इत्यादिषु विश्वविद्यालयेषु विद्यावारिधिस्तरे छात्राणां मार्गदर्शनं कृतवन्तः । अस्माकं प्राध्यापकाः विविधविश्वविद्यालयानां अध्ययनमण्डलानां सदस्याः सदस्याः सन्ति । अन्यत्रापि प्रतिष्ठितासु संस्थासु ते सदस्याः यथा Routledge Asian Studies Association of Australia, Indian Network of Memory Studies, IIT Madras, Political Science and Public Opinion, Gexin Publications, Global Media Education Council, and South Asia Communication Association.

एतदतिरिच्य केचनप्राध्यापकाः विविधायोगतपरीक्षाणां प्रश्नपत्रनिर्माणसमितेः सदस्यत्वेन कार्यमपश्यन् । यथा - Jammu and Kashmir Public Service Commission, IGNOU, and CUET इति तेषु केचन सन्ति ।

केचनप्राध्यापकाः तेषां महत्त्वपूर्णशैक्षणिकयोगदानार्थं विशेषसम्माननं प्राप्तवन्तः । यथा – हिन्दी विभागस्य प्रा. रेखा सेठीमहोदया संयुक्तराष्ट्रसंघस्य`वातायन`संस्थया प्रदत्तेन अन्ताराष्ट्रियहिन्दीशिक्षणसम्मानेन अलङ्कृता । प्रा. सुजायता चौधरीमहाभागा च शहीदभगतसिंगमहाविद्यालये आयोजितायां G20 सम्बद्धायाम् अन्तारष्ट्रियपरिषदि उत्कृष्टसंशोधनपत्रस्य पुरस्कारेण सभाजिता ।

विगतसत्रे दश प्राध्यापकाः विद्यावारिधिपदवीम् अधिगतवन्तः । तत्र डा. दिशा पोखरियालः,डा. रिचा केला, डा. दीपिका भाटिया, डा. गिरीशः शास्त्री, डा. अनिशा कौल, डा. सीमा टामटा, डा. ज्योतिः सिंहः, डा. प्रदीपकुमारः, डा. मनोजकुमारः, डा. पूर्णिमा लङ्का आदयः अन्यतमाः ।एतेषां सर्वेषां हार्दम् अभिनन्दनम् । अत्यन्तप्रतिष्ठितस्य प्रोफेसरपदस्य अर्जनाय डा. प्रोफे. विजयः गौतमः, डा. रूपाली गोयन्का, प्रोफे. सीमा सिंहः चेत्येतेभ्यः त्रिभ्यः प्राध्यापकैः महता हर्षेण वयम् अभिनन्दयितुम् इच्छामः ।

शिक्षेतरकर्मचारिणाम् उपलब्धयः

अस्माकं महाविद्यालस्य शिक्षेतरकर्मचारिणः अपि आवर्षम् जागरूकाः सन्तः विविधेषु प्रशिक्षणेषु,कार्यशालासु भागं गृह्णन्ति। केचन स्वक्षेत्रस्य विशेषज्ञानार्थम्, ज्ञानस्य अद्यावधिकरणार्थं च परिषत्सु, पाठ्यक्रमेषु वा सहभागितां दर्शयन्ति । तेषु केषाञ्चन नामानि अत्र दीयन्ते । श्री.अनिकेतः शर्मा One week FDP, श्री. विमलः भटः One week workshop on "Capacity Building, श्री. मधु चौहानः One week FDP "Training Programme, श्री.राजनः शर्मा Training Programme for Laboratory and Technical Officials नामिके साप्ताहिकवर्गे भागम् अवहन् । श्री. जगदीशः काण्डपालवर्यः अ-स्तरीयादिकर्तृणां कृते आयोजिते "Training Programme - Administrative Management Skills" नामके चतुःसप्ताहात्मकेवर्गे भागम् अवहत् । श्रीमती अल्का सेठी, श्रीमती विनीता बरुआ, श्रीमती बबिता सिंघलमहोदया च उच्चशिक्षाविभागस्य कौशलविकासकार्यक्रमे भागम् अवहन् । श्री. आशिषकुमारः कौशलविकासविषयके प्रमाणपत्रपाठ्यक्रमे भागं गृहीतवान् । श्रीमती राधिका गुप्ता DELNET and INFLIBNET नामिकया प्रसिद्धसंस्थया आयोजितायां परिषदि "Empowering Libraries, Connecting Communities" इति विषये स्वस्य संशोधनपत्रं प्रस्तूय प्रकाशितवती ।

छात्राणाम् उपलब्धयः

इन्द्रप्रस्थमहिलाविद्यालयस्य छात्राः शैक्षिकक्षेत्रे शिक्षेतरकार्यक्रमेषु च आवर्शं भागं वहन्त्यः महाविद्यालयस्य मानं वर्धयन्ति । अस्मिन् वर्षे विविधकार्यक्रमेषु स्पर्धासु च प्रथमद्वितीयादिस्थानम् अर्जितवतां छात्राणां नामानि अत्र दीयन्ते । एतासां सर्वासां छात्राणां विशेषोपलब्धिनां कृते महाविद्यालयः ताः सर्वाः अभिननदयति ।

सङ्गणकविज्ञानविभागः -

कु. ज्योतिर्मयी बारिकनामिका छात्रा विश्वस्तरीयायां निबंधलेखनस्पर्धायां द्वितीयस्थानं प्राप्तवती । कु. सिमरन वसिष्ठनमिका छात्रा `नवरङ्ग २३` नामके विश्वविद्यालयस्तरीयायां Western Group Dance Competition मध्ये द्वितीयस्थानं प्राप्तवती । महाविद्यालयस्य K-Pop dance स्पर्धायां प्रथमस्थानं, आन्तर्विभागीयक्रिकेटक्रीडायां च प्रथमस्थानम् अर्जितवती । 7th International Conference On Nanoscience And Nanotechnology (Iconn 2023) नामिकायाम् अन्ताराष्ट्रीयपरिषदि भागं गृहीतवती ।

कु. गौरी सक्सेना अन्ताराष्ट्रीयपरिषदि 'Role of Vehicular Delay Tolerance Network in Smart Cities' इतिविषयकं शोधपत्रं संशोधितवती । महाविद्यालयस्य K-Pop dance स्पर्धायां च द्वितीयस्थानं प्राप्तवती ।

अर्थशास्त्रविभागः -

समृद्धिः श्रीनामिका छात्रा अन्ताराष्ट्रीयबालिकादिवसनिमित्तम् आयोजिते आस्ट्रेलिया हायकमिशन्द्वारा आयोजितायां समितिचर्चायां भागम् अवहत् । तत्र सा मिलानसंस्थायाः विशेषप्रतिनिधिरूपेण आस्ट्रेलियादेशस्य सिनेट – अध्यक्षं मिलीतवती ।

कु. इशिका बाबरनामिका छात्रा अर्थशास्त्रसम्बद्धायां case study विषयकस्पर्धायां भागं गृहीतवती ।

कु. मेहक पालनामिका छात्रा DDA and WWF नामिकाभ्यां संस्थाभ्यां प्रायोजितायम् monsoon biodiversity विषयिण्यां परियोजनायां कार्यकर्तारूपेण कार्यं कृतवती।

कु. मानसी अग्रवाल, कु. प्राची दत्ता, कु. तनिषा च विश्वविद्यालयस्तरीये MUN कार्यक्रमे भागम् अवहन्।

इतिहासविभागः –

कु. निशा गोयलनामिका छात्रा 'G-20 Summit' विषयके आन्तर्विभागीयसमूहचर्चासत्रे भागं गृहीतवती। कु. प्रश्निका मुजूमदारनामिका छात्रा आन्तर्विभागीयसमूहचर्चासत्रे भागं गृहीत्वा प्रथमक्रमाङ्कं प्राप्तवती। CAG संस्थया निबन्धस्पर्धायां प्रथमस्थानं प्राप्तवती। कु. कशिश त्यागीनामिका छात्रा U21 Global Citizens नामके कार्यक्रमे सहभागार्थं SDG-Aware microcredential इति सम्मानं प्राप्तवती।

तत्त्वज्ञानविभागः –

कु. सुकन्या दत्ता Inter- College Folk Orchestra Music Competition नामिकायां स्पर्धायां प्रथमस्थानम् अर्जितवती। कु. अन्विका शर्मा अनिद्रापथनाट्यस्पर्धायां द्वितीयस्थानम् अर्जितवती। सा राष्ट्रीयनाट्यस्पर्धायां, "Abhivyakti 23" नामके कार्यक्रमे दिल्लीविश्वविद्यालयस्य विविधमहाविद्यालयानां स्पर्धासु च भागं गृहीतवती। कु. अनन्या पाण्डेय CG State Closed Squash Championship, Hamdard 2nd Squashters Open, 3rd All India Brahmaputra Open इत्यादिषु च स्पर्धासु भागं गृहित्वा स्थानम् अर्जितवती। कु. वंशिका अग्रवाल प्रथमवर्षय्स्य छात्रा मातासुन्दरीमहाविद्यालयस्य वादविवादसमित्याः Deputy Director General पदे बहुमानं प्राप्तवती। कु. गौरवी, open mic स्पर्धायां, आन्तरमहाविद्यालयीनप्रश्नमंजूषास्पर्धायां च प्रथमस्थानं प्राप्तवती। सा
प्राची फाउण्डेशनसंस्थायाः द्विमासिकसभासदत्वम् अपि प्राप्तवती।

राज्यशास्त्रविभागः –

कु. दीक्षा चक्रवर्ती 3rd annual parliamentary debate स्पर्धायां novice criteria गणे प्रथमस्थानं प्राप्तवती। कु. शिवांगी राजनामिका छात्रा Becon Academy MUN Indonesia संस्थायाः उत्कृष्ट –अतिथिसम्मानं प्राप्तवती। कु. रान्या राणा बह्वीषु रज्यस्तरीयबैडमिन्टनस्पर्धासु प्रथमस्थानम् अर्जितवती। कु. प्रियांशी, कु. हर्षिता धिंग्रा, प्रश्नमंजुषा स्पर्धायां प्रथमस्थानम् अर्जितवती। कु. आरुषी कोतवालनामिका छात्रा बहुषु राष्ट्रीयबुद्धिबलक्रीडास्पर्धासु सुवर्णपदकं प्राप्तवती। कु. गोल्डी कुमारी लोकगीतस्पर्धायाम् अन्यत्र च पर्थमस्थानं प्राप्तवती। कु. नम्रता कालितानामिका छात्रा Delhi Youth Parliament 2023 मध्ये भागग्रहणार्थं प्रशतिपत्रं स्मृतिचिह्नं च प्राप्तवती।'Mental Health, Sexuality and Youth' विषयके कलास्पर्धायां सा प्रथमस्थानं प्राप्तवती। संपदानामिका छात्रा Photo Film competition स्पर्धायां प्रथमस्थानं प्राप्तवती। बहुप्रतिष्ठिता Think Big Fellowship 2024 अपि तया प्राप्ता अस्ति। Brics International Forum (LSR initiative) इत्यत्र कु. रितिका दास, Content writer अर्थात् विषयलेखकत्वेन कार्यं कृतवती। Theirworld नामिकायाः संस्थायाः Global Youth Ambassador नामकं पदं तया प्राप्तम् अस्ति।

संस्कृतविभागः –

कु. प्राची तिवारी राष्ट्रीयसंस्कृतविश्वविद्यालयेन आयोजितायां राष्ट्रीयसंस्कृत – ओलम्पियाडस्पर्धायां प्रथमस्थानम् अर्जितवती।

समाजशास्त्रविभागः –

कु. आफरीन जहाननामिका छात्रा Leo Club संस्थया आयोजितायां `ध्रुवतारा`नामकपरियोजनायां भागम् अवहत् । तन्त्गतशिक्षणसम्बद्धे शोधकार्यक्रमे कु. अनिन्दिताकुमारी भागं गृहीतवती । GDC नामिकायां प्रसिद्धस्पर्धायां कु. इशिका माल्हाननामिका छात्रा द्वितीयस्थानं प्राप्तवती । कु. काशिका सिंहनामिका एन,एस्.एस्,कार्यकर्त्री दिल्लीछात्रसेनायां (Delhi Contingent) भागं गृहीतवती ।

विभागीयशैक्षिकोपक्रमाः

वाणिज्यविभागः –

१ फरवरीदिने Treasure Hunt Competition - The Millet Searchers स्पर्धायाः आयोजनं वाणिज्यविभागेन कृतम् । २५ अप्रैलदिने 'BIZFIESTA' उत्सवस्य आयोजनम् अभवत् । Shipwreck: Business Simulation competition, Managers' Bizz: Case Study competition स्पर्धा च अस्मिन् दिने आयोजिताः । ८ अगस्तदिने 'Yoga for Success' कार्यक्रमे Isha Foundation संस्थायाः कार्यकर्त्री `योगनमस्कारं, ओंकारोच्चारणादिकं च पाठितवती । १८ अगस्तदिने 'Case studies and Guesstimates' विषये कार्यशालायाः आयोजनम् अभवत् । श्री. अमितः पोद्दारवर्यः उपस्थितान् १५० छात्राः उद्बोधितवान् । २६ अक्तूबरदिने 'Mutual Fund & SIP' विषये श्री. हरगोविन्दः सचदेववर्यः भाषणं कृतवान् ।३० अक्तूबरदिने आयोजिते'Digital Marketing' विषये श्री. आकाशः गोग्रीवर्यः, Indian Institute of Digital Education संस्थायाः वरिष्ठाधिकारी मार्गदर्शनं कृतवान् । तत्र छात्राः Indian Institute of Digital Education इत्यादीनां विषये सम्बोधिताः । National Small Industries Corporation (NSIC), Okhla इति संस्थायाः दर्शनं छात्राः ५ दिसंबरदिने कृतवन्तः विशिष्टं मार्गदर्शनं च प्राप्तवन्तः ।

सङ्गणकविज्ञानविभागः – "Digital Transformation and Artificial Intelligence: Opportunities and Challenges," विषये अनेन विभागेन १५ मार्चदिने आयोजनं कृतम् । "Ayurveda: A Philosophy of Complete Health" विषयकः कार्यक्रमः ८ अगस्तदिने आयोजितः । २५ अक्तूबरदिने Best Practices for Testing and Validating Machine Learning Deployments" विषयकस्य राष्ट्रीयपरिषदः आयोजनम् अभवत्। तदा डा. तिलोत्तमा गोस्वामी सम्बोधितवान् । "Artificial Intelligence and Innovation Driving New India's Techade" विषयम् आधृत्य २५ अक्तूबरदिने चर्चासत्रम् आयोजितम् । तदा श्री. अजहरः सैय्यद (Global Chief Technologist, RedHat U.S.A), Mr. Uday Raghunath Birje(Co-Founder and Director – Think Street Technologies.), श्री. उदयः रघुनाथः बिरजे वर्यौ च मार्गदर्शनं कृतवन्तौ ।

पर्यावराणाध्ययनविभागः – ०२ फरवरी दिने अनेन विभागेन Yamuna Biodiversity Park.इत्यत्र छात्रैः सह उपस्थाय तत्रस्थपर्यावरणवैविध्यस्य विषये ज्ञानं प्राप्तम् । १७ फरवरी दिने महाविद्यालयपरिसरे विद्यमानानां पक्षिणां गणनायाः कार्यक्रमः Cornell Lab of Ornithology and National Audubon Society, USA अनया संस्थया सह आयोजितः । तदा २९ पक्षिप्रकाराः अङ्किताः । भूगोलविभागेन सह ५ जूनदिने `जागतिकपर्यावरणदिनस्य` आयोजननिमित्तं Reel-making स्पर्धा, पर्यावरणसाक्षरतास्पर्धा च आयोजिता । २६ सप्टेंबरदिने प्रसिद्धा पर्यावरणतज्ज्ञा डा. पूर्णिमा देवी बर्मन् माहाविद्यालयम् उपस्थाय'Community-based Conservation' विषये छात्राः उद्बोधितवती । वायुप्रदूषणविषये ६ अक्तूबरदिने National Museum of Natural History (NMNH) and Ministry of Environment, Forests and Climate Change (MoEFCC), Govt. of India इत्येतासां संस्थानां सहयोगेन

विशेषः कार्यक्रमः आयोजितः । तत्र वैज्ञानिकः डा. सि. आर. महेशवर्यः मार्गदर्शनं कृतवान् । ६५० संख्यांकाः छात्राः कार्यक्रमम् उपस्थाय प्रतिज्ञां स्वीकृतवन्तः ।

इतिहासविभागः –

३ नवम्बरदिने "Remembering Rani Gaidinliu: A Forgotten Freedom Fighter of Indian Freedom Movement," इति विषयकं डा. निलाञ्जनः डेवर्यस्य ओनलाईनमाध्यमेन व्याख्यानम् आयोजितम् ।

मल्टीमिडिया तथा जनसञ्चारविभागः - अनेन विभागेन वर्षारम्भे Copyright Law and Infringement विषयिणी परिषद् ७ जनवरी दिनाङ्के आयोजिता । “Lost Partitions” नामकस्य चलच्चित्रस्य प्रदर्शनं १८ जनवरीदिने अभूत् । 'Parliamentary Reporting' विषयिणी विशिष्टा कार्यशाला कु. इतिका सिंह, कु. मितिशा शर्मा महोदययोः सञ्चालिता । भरतपुरस्थे Keoladeo National Park नामके उद्याने 3-४ फरवरीदिनयोः विभागीयछात्राणां यात्रा आयोजिता आसीत् । १३ फरवरीदिने 'The Wave Forward' Radio Festival द्रष्टुं the India International Centre नामकं स्थानं गतवन्तः। भारतीयवस्त्राणां विषये विशेषज्ञानार्थं २५ फरवरीदिने 'USTTAD project अन्तर्गततया कार्यशालायाः आयोजनं कृतम् आसीत् । ११ सप्तेंबरदिने 'International Reportage' विषये यशालायाः आयोजनं France’s ‘Médias Monde Academy’ संस्थया सह कृतम् आसीत् । तदा फ्रांसदेशात् Charles Wente and François Picard वक्तारौ उपस्थितौ आस्ताम् ।१३ सप्तेंबरदिने PHDCC संस्थया आयोजितस्य Media Summit कार्यक्रमे छात्राः उपस्थिताः ।'Fact-checking and Visual Verification' विषये २२ सप्तेंबरदिने कार्यशालायाः आयोजनं कृतम् आसीत् । २० अक्तूबरदिने छात्राः `अवकरात् उत्कृष्टवसुनिर्माणम्` इति विषयिणीं कार्यशालां द्रष्टुम् `राजघाटम्` उपस्थिताः । ४ – ५ दिसेम्बरदिनयोः छात्राः `अमर उजाला मुद्रणालयं` द्रष्टुं गतवन्तः मुद्रणप्रक्रियां च ज्ञातवन्तः ।

दर्शनविभागः -

‘Young Philosophers talk’ (वार्षिकोत्सवः तथा आपृच्छाकार्यक्रमः) इति प्रथमः कार्यक्रमः २६ अप्रैल दिने समायोजितः । छात्राध्यापकयोः संवादः अस्य कार्यक्रमस्य वैशिष्टयम् आसीत् । उभाभ्यामपि तत्त्वज्ञानकारणेन तेषु जातानि विशिष्टानि भावत्मकानि परिवर्तनानि यथा सम्पादितं समस्यानिराकरणसार्थ्यं,संकल्पनानाम् आकलनम्, स्वक्षमतानां विकासः, लेखनकौशलम् इत्यादीनां विषये चर्चा कृता । विभागप्रमुखया मा. डा. पौलवीदासया छात्राः सम्मानिताः । भविष्यनिर्माणे अवरोधभूतानां सम्भ्रमाणां निराकरणे कथं तत्त्वज्ञानं सहायकं भवति इत्यस्मिन् विषये, सा छात्रान् उद्बोधितवती ।

प्रथमसत्रप्रवेष्ट्रणां नवागतछात्राणां स्वागतकार्यक्रमः २३ सप्टेंबर२०२३ तमे दिने `परिपूर्णता भ्रमजनिका' इति विषयम् आश्रित्य छात्राणां शारीरिकमानसिकभावात्मकतां सर्वसमावेशकतां च लक्ष्यीकृत्य आयोजितः ।

२९ नवंबरदिने विश्वतत्त्वज्ञानदिननिमित्तम् आयोजिते आईसिसिआरसंस्थायाः आर्थिकानुदानेन प्रायोजिते कार्यक्रमे प्रमुखातिथिः प्रा.हरिशंकरप्रसादः (पूर्वविभागप्रमुखः तत्त्वज्ञानविभागः, देहली.), विशिष्टातिथिः प्रा. एवद्रो विरा केरिकस, (प्रा. संवादशाखा, फेड्रल विश्वविद्यालयः, तत्त्वज्ञानसंकायस्य संशोधकश्च), प्रा. एस्तिल्ता (योगविशेषज्ञः) राष्ट्रिय-अन्ताराष्ट्रियस्तरीयेषु विश्वविद्यालयेषु सक्रियौ विषयज्ञौ छात्रौ अपि विशेषातिथित्वेन निमन्त्रितौ आस्ताम् । प्रा.हरिशंकरप्रसादः `भारतीयतत्त्वज्ञानं मनसः चिकीत्सोपमम् □ इति विषयम् आधृत्य भाषितवन्तः । भारतीयसंविधानस्य रचनायां, सृष्टिरचनायां, देवता तत्त्वज्ञानस्य पात्रम् इति विषये अपि मार्गदर्शनं प्राप्य छात्राः आनन्दिताः आसन् ।

राज्यशास्त्रविभागः -

१७ जनवरी दिने विभागीयाः छात्राः भारतीयसंसदः दर्शनाय पाध्यापकै सह गत्वा PRIDE संस्थया सञ्चालितस्य कार्यक्रमस्य माध्यमेन `गांधीस्मारकम् अन्यस्थलानि च दृष्टवन्तः । संशोधनपद्धतिविषयिणी विशिष्टा कार्यशाला ३१ जनवरीदिने आयोजिता आसीत् । तत्र अशोकाविद्यापीठस्थाः प्राध्यापकाः मार्गदर्शनम् अकुर्वन् । ICSSR संस्थया प्रायोजितायाः Understanding South Asia- Security Challenges: Traditional and Non-Traditional विषयकस्य अन्ताराष्ट्रीयपरिषदः आयोजनं २१ – २२मार्चदिनयोः अभूत् । जूनमासे विभागेन - 'Services To the Nation नामकस्य चर्चा सत्रस्य, 'Unveiling Unity' नामकस्य चित्रावगमनस्पर्धायाः, भारतीयनदीनां विषये वेबिनारनामकस्य विशेषकार्यक्रमस्य च आयोजनं कृतम् । १० अक्तूबरदिने 'India and Bangladesh Relations in the context of Indo-Pacific and G20 India Summit' विषयाधारीतस्य चर्चासत्रस्य आयोजनम् अभवत् । २९ – ३० दिनयोः संविधानदिनस्य मतदानपत्रपञ्जीकरणाभियानस्य आयोजनम् अभवत् ।

समाजशास्त्रविभागः –

Tribal Empowerment विषयकः कार्यक्रमः अनेन विभागागेन १४ अगस्तदिने समायोजितः ।तत्र Dr Avitoli G. Zhimo महोदयः ५५ छात्राः मार्गदर्शनं कृतवान् । `आजादी का अमृतमहोत्सव`इति अभियानस्य अन्तर्गततया आयोजितेन वेबिनारमाध्यमेन वक्त्रा छात्राः सम्प्रेरिताः ।

बी.ए. प्रोग्रामविभागः - "The File that is Life," विषयकः उत्तमः कार्यक्रमः अनेन विभागेनसञ्चालितः । तत्र श्री. अमिताभः प्रसादः IAAS संस्थायाः मान्यः अध्यक्षः छात्राः उद्बोधितवान् । Lowering the Limits of Freedom: A Philosophical Perspective चर्चासत्रं २४ जनवरीदिने आयोजितम् । ६ फरवरीदिने'A Deux Conversations and Memories' विषये कार्यक्रमः आयोजितः । प्रसिद्धस्य IP LitFest '23 आयोजनं २३ फरवरीदिने अभवत् । तत्र पद्मश्रीविभूषिता मालिनी अवस्थी, सुश्री. रीता कोठारीवर्ये च उपस्थिते आस्ताम् ।६ मार्चदिने अन्ताराष्ट्रीयमातृभाषादिनमवलम्ब्य `एकता`नामकस्य कार्यक्रमस्य आयोजनम् अभ्वत् । G20 empower Conclave (Empowerment and Progression of Women's Economic Representation) नामके प्रतिष्ठिते कार्यक्रमे अयं विभागग़् सक्रियतया २ फरवरीदिनाङ्के उपस्थितः आसीत् । FULBRIGHT -NEHRU INTERNATIONAL EDUCATION ADMINISTRATORS जनाः ६ मार्चदिने महाविद्यालये अनेन विभागेन आहूताः । २३ मार्च दिने दिल्लीविश्वविद्यालयेन आयोजिते'Seva Parmoh Dharma': C20 Chaupa नामके कार्यक्रमे अयं विभागः उपस्थितः आसीत् ।

अस्माकं महाविद्यालस्य सर्वैः विभागैः महता परिश्रमेण आयोजितानाम् उपक्रमाणां कार्यक्रमाणां च कृते महाविद्यालयः छात्रकल्याणाय प्रबोधनायच रतान् सर्वान् अभिनन्दति ।

राष्ट्रियसेवायोजना

इन्द्रप्रस्थमहिलामहाविद्यालयस्य राष्ट्रियसेवायोजनया अस्मिन् शैक्षणिकवर्षे बहवः कार्यक्रमाः अयोजिताः बहुषु च सामाजिकगतिविधिषु भागः गृहितः । *'Not Me, But You'*(नाहं भवान्) इति ध्येयवाक्यं स्मरन्तः महाविद्यालये, समाजे, छात्रेषु च जागरुकताजननार्थं, महाविद्यालयस्य चैतन्यरक्षणार्थं च निरन्तरतया इदं केन्द्रं कार्यम् अकरोत् ।

जीवनोन्नतिविषयकाः गतिविधयः विहाय अनेन केन्द्रेण बहवः अन्याः कार्यक्रमाः आयोजिताः। तत्र वैश्विकशब्दान्वेषणदिवसकार्यक्रमः, पराक्रमदिवसः, राष्ट्रिययुवासंसद्दिवसकार्यक्रमः, SVEEP सप्ताहकार्यक्रमश्च प्रमुखाः आसन् ।
जागतिककर्करोगदिने व्याख्यानस्य आयोजनम्, वृक्षारोपणम्, जागरुकता यात्रा, स्फोरकपत्रनिर्माणस्पर्धा इत्यादयः फरवरीमासे आयोजिताः । ***'World Down Syndrome Day'*** दिने आयोजिते परिसरयात्रायां छात्राः पीतवर्णीयवस्त्राणि धृत्वा अत्र उपस्थिताः । ***Doodle Making Activity*** **इति नामिका गतिविधिः छात्राणां कलात्मकसर्जकतायाः** प्रचोदनार्थम् आयोजिता । ***Cervical Cancer*** नामकस्य रोगस्य विषये जागरुकतावर्धनार्थं २९ मार्चतमे दिने व्याख्यानस्य आयोजनं कृतम् । International Transgender Visibility Day दिवसस्य आचरणार्थं ३ अप्रैलतमे दिने *Drug Awareness Campaign अभियानस्य* च १३ मार्चदिने तथा १४ दिनाङ्के सुरक्षाभ्यासस्य महत्त्वविषये विशेषकार्यक्रमस्य आयोजनं अभवत् ।

२० अप्रैलतमे दिने कर्तव्यम् – २०२३ नामकस्य वार्षिककार्यक्रमस्य अयोजनम् अभवत् । प्रसिद्धः वक्ता श्री. नवीन गुलिया अस्य कार्यक्रमस्य उद्घाटनम् अकरोत् । Conscious Couture, Tote-Bag Painting, and a JAM Competition सदृशाः अन्येपि कार्यक्रमाः तदङ्गतया सञ्चालिताः ।

Nidaan's Phase-II: E-Waste Collection Drive नामकस्य परियोजनायाः अन्तर्गततया २४ अप्रैलतः २६पर्यन्तं बहवः कार्यक्रमाः आयोजिताः । यथा जागतिकपृथिवीदिने स्वच्छताअभियानेन सह वृक्षारोपणकार्यक्रमः आयोजितः । २० मे दिनाङ्के मार्गसुरक्षाप्रतिज्ञा जागरुकताभियानस्य अङ्गतया सर्वैः गृहिता ।

२० मई दिने मार्गसुरक्षाप्रतिज्ञायाः आयोजनम् अभवत् । २३ मई दिने महाविद्यालये सर्वैः `जैवविविधताभ्रमणम्` कृत्वा परिसरे विद्यमानां जीवानां विषये ज्ञानम् अधिगतम् । वैचारिकमथनदृष्ट्या नेत्रोन्मूलकं आनलाईनवादसत्रं २६ मई दिने आयोजितम् । ***'Mission Life: Plastic is Drastic'*** (जीवनस्य लक्ष्यम्: प्लास्टिक हानिकारकम्।) इति अस्य मुख्यचर्चाविषयः आसीत् । अस्य मासस्य अन्तिमसत्रम् ३१२ मई ***World No-Tobacco Day*** दिने पर्यावरणविषयक प्रतिज्ञाग्रहणेन ***Pledge Taking Activity*** अभवत् ।

जूनमासस्य आरम्भः तावत् विश्वद्विचक्रिकादिनस्य ***World Bicycle Day*** आचरणेन अभवत् । विश्वपर्यावरणदिनस्य औचित्यमुपलक्ष्य भूगोलविभागस्यसंयुक्ततत्त्वावधानेन बहवः कार्यक्रमाः आयोजिताः । तस्येदं विवरणम् । विश्वसुरक्षादिने **A *Crossword Puzzle*** स्पर्धा आयोजिता । विश्वबालककर्मिदिनस्य विरोधात् जागरणाभियानं सञ्चालितम् । विश्वरक्तदातादिनमुपलक्ष्य घोषवाक्यलेखनस्पर्धा, आनलाईनव्याख्यानं च आयोजितम् । विश्वयोगदिने सपरिवारम् योगाभ्यासः, द्विवसात्मिका योगकार्यशाला, प्रतिज्ञाग्रहणकार्यक्रमः च आयोजितः आसीत् । ***Autistic Pride Day*** दिने **polaroid painting** इति विशेषचित्रप्रकारस्य स्पर्धा आयोजिता ।

International Olympics Day विश्व-ओलम्पिकदिननिमित्तम् विविधधावनस्पर्धानाम् आयोजनं जातम् । वस्त्रदानकार्यक्रमेण अस्य मासस्य आयोजनानि अवसितानि । १० जुलै दिने पर्यावरणविषये जागरणाय ***International Plastic-Free Bag Day*** दिनस्य औचित्यं संसाध्य ध्येयवाक्यलेखनस्पर्धा आयोजिता ।

३ अगस्तदिने `अङ्गदानमहोत्सवाअन्तर्गततया` प्रतिज्ञाग्रहणम् डा. अ. अरूणवर्यस्य आनलाईनव्याख्यानं च आयोजितम् । ४ अगस्तदिने अवयवदानस्य मिथकनिवारणार्थं कार्यक्रमः आयोजितः । ५ अगस्तदिने ध्येयवाक्यलेखनस्पर्धा विश्वयुवादिनम् आश्रित्य राज्यशास्त्रविभागेन सह संयुक्ततया आयोजिता । `मेरी माटी मेरा देश` इति प्रचाराभियानान्ततया पञ्चप्राणप्रतिज्ञा छात्रैः गृहिता । १४ अगस्तदिने राष्ट्रियसंयुक्तसंघः सततविकासश्च इति संकल्पनां केन्द्रीकृत्य ध्येयवाक्यनिर्माणप्रतियोगिता आयोजिता । ११ सप्टेंबरतः २५ सप्टेंबरपर्यन्तं स्वच्छतासप्ताहविषयके कार्यक्रमः आयोजितः । २५ सप्टेंबरदिने राष्ट्रियसेवायोजानादिनसन्दर्भे आरम्भिकव्याख्यानम् डा. नरेन्द्रकुमारविश्नोईवर्यस्य `सामुदायिकविकासे युवकानां पात्राम्` इति विषये अभवत् । तदननतरं जैमसत्रम्, छायाचित्राणां च सत्रं सञ्चालितम् आसीत् । २९ सप्टेंबरदिने स्वच्छाता एव सेवा इति विषयिणी प्रतिज्ञा छात्रैः गृहिता ।

अक्तूबरमासे “Ek Kadam Swachhata Ki Aur: Ek Tareekh-Ek Ghanta” इति शीर्षकाधारीतं ६० छात्राणां ५० प्राध्यापकाणां च सहभागितया खैबरपासमेसनामके स्थले उपस्थाय सर्वैः स्वच्छताविषये तत्रस्थजनानां चैत्तानि आकर्षितानि ।अत्र मा. प्राचार्याणां सक्रिय –उपस्थित्या तस्याः मार्गदर्शने च सर्वे कार्यं कृतवन्तः ।

२ अक्तूबरदिने गान्धिजयन्तिमुपलक्ष्य स्वच्छतास्वतंत्रताधावनम् २९ छात्रैः १३ प्राध्यापकैः च सम्मिल्य कृतम् । ३ - ४ अक्तूबरदिनयोः छात्रैः ४ कि.मी अन्तरं यावत् धावित्वा स्वस्थभारतसन्देशः प्रसारितः। स्वच्छताविषयकमेकमभियानं १२ दिनाङ्कतः ३१दिनाङ्कपर्यन्तम् आयोजितं यत्र शताधिकैः छात्रैः भागः गृहितः ।

१६ अक्तूबरदिनांङ्के लोकसभाविधायकः मा. श्री. मनोजः यादवः `अमृतकलशयात्रायां`समागत्य मेरी माटी मेरा देश` इत्याख्यस्य अभियानस्य विषये छात्राः प्रेरितवान् ।

राष्ट्रीय–कैडेट–कोरम्

इन्द्रप्रस्थमहिलामहाविद्यालय: 17 अक्टूबर 2023तमे दिनाङ्के महत्वपूर्णस्यैकस्य कार्यक्रमस्य प्रत्यग्रगामी बभूव । यस्मिन् राष्ट्रीय–कैडेट–कोरम् (एनसीसी) अप्यासीत् । अत्र कार्यक्रमे मुख्यातिथित्वेन विराजमाना श्रीसंजय पी. विश्वरावाः आकर्षणस्य केन्द्रविन्दवः आसन् । कार्यक्रमस्योद्देश्यम् 2047 वर्षपर्यन्तं विकसितभारतस्य कल्पनायाम् अस्य भूमिका इत्यासीत्। महोत्सवमामनत्ति ! कार्यक्रमस्य आरम्भः अतिरिक्तमहानिदेशालयस्य श्रीसंजय पी. विश्वरावाणां अन्येन स्वागतेन अभवत् । एनसीसीसदस्यै: शुचिवस्त्राणि परिधत्तानि । अनुशासनं व्यपालयन् सम्मानं च स्थापितया अनन्तरमस्य अलापसमाजेन सरस्वतीवन्दनां श्विधाय दीपमज्वालि । श्रीमान् संजय पी. विश्वराव : " विकसितं भारतम् 2047 इति हेतो: अमृतकालकैडेट्स 2047 इति विषयमाधृत्य भाषणमदात् ।सः देशस्य भविष्यं सुदृढं कर्तुं देशस्य यूनाम् विशेषत: एनसीसीसदस्यानां भूमिका ख्यातवान्सः विकसितभारतम् (2047) प्रति एनसीसीसदस्यानां प्रतिबद्धतायै, समर्पणाय प्रोत्साहितवान् मुख्यातिथिः अमृतकालकैडेट्स 2047 इत्यारम्भं विवृणुतवान् ।नेतृत्ववर्धापने अनुशासनभावनोत्पादने सेवाभावनायाः च वर्धापने अस्य महत्वं ख्यापितवान् । कैडेटछात्राणां मध्ये एव सः ताः प्रगत्यै योगदानं दातुं सक्रियरूपेण

भागं ग्रहीतुं च स्वीयेन सह प्रोत्साहितवान् । अमृतकालारभ्य 2047 वर्षं यावत् समृद्धस्य विकसितस्य भारतस्य चिन दृष्टिकोणेन पूर्णानि स्वप्नानि साकाराणि कर्तुं राष्ट्रस्य प्रगतये आवश्यकान् गुणानाधातुं राष्ट्रीय-कैडेट-कोर द्वारा स्वीकृतां महत्वपूर्णभूमिकाम् आमिनोति । एनसीसी नेतृत्वविकासाय विशिष्टां भूमिकामावहति । विभिन्नैः पुलिनैः प्रशिक्षणकार्यक्रमै: शिविरैः गतिविधिभिरच कैडेटेषु अनुशासनस्य दायित्वस्य समूहसक्रियतयाश्च गुणाः आरोप्यन्ते। इमे गुणाः कस्यापि नेतुः आधाररूपेण भवन्ति। अयममृतकालः देशभक्तिं राष्ट्रीयभावनां चोद्भावयति ।

एनसीसी नैतिकमाधारं स्वीकृत्य कैडेटानां मध्ये देशप्रेमवर्धापनेन राष्ट्रभक्त्युद्भावेन च महद्भूमिकामावहति । देशभक्तेः इयं 2047 पर्यंतं विकसितं भारतं लक्ष्यीकृत्य तेषां काचित् अन्यतमा प्रेरणा अस्ति । अमृतकाल: युवकान् व्यावहारिकरुपेणापि सक्षमान् भवितुं प्रेरयति । एनसीसी सदस्यान् संचारं, संकटयुधदादिकम् इत्यादिविविधप्रकारकान् कौशलान् विकासयति। आापतकाले मञ्चप्रदानमपि करोति । इमानि कौशलानि राष्ट्रस्य सामाजिकस्य आर्थिकस्य च विकासस्य योगदानाय आवश्यकानि। अमृतकालदर्शनस्य मुख्यबिन्दुः राष्ट्रं प्रति सेवाभावना वर्तते । एनसीसी कैडेटान् दायित्वं बोधयन् सहानुभूतिभावनां च दर्शयन् विविधेषु सामुदायिकसेवाकार्यक्रमेषु सक्रियरुपेण सहभागयति । कैडेटा: सामाजिककल्याणगतिविधिषु भागं ग्रहीतु समाजस्योत्थानाय च योगदानं प्रदातुं प्रोत्साहायति । अमृतकाल: अनुशासितस्य नैतिकसमाजस्य च महत्त्वमुररीकरोति । एनसीसीप्रशिक्षणै: नैतिकमूल्यानि स्वीकृत्य कैडेटान् दायित्ववतः नागरिकान् कर्तुं महद्बलं ददाति । अयमाधार: तादृशसमाजनिर्माणाय महत्वपूर्णोऽस्ति या धार्मिकताया अखण्डतायाः धार्मिकतायाश्च सिद्धान्तानुपजीवति । 17 अक्टूबर 2023तमे दिनांके इन्द्रप्रस्थमहिलामहाविद्यालये आयोजिते कार्यक्रमे एनसीसी यूनां सक्रिया सहभागिता आसीत्। अतिरिक्तमहानिदेशालयस्य श्रीसंजय पी. विश्वराववर्याणां सम्माननीया उपस्थित्या कार्यक्रमस्य अकल्पनीया सफलता आसीत् । अनेन कार्यक्रमेण न केवलम् अमृतकाल कैडेट् 2047 इत्यारम्भस्य प्रसन्नानुभूता अपितु यूनां कृते 2047 पर्यंतं विकसितभारतस्य कृते योगदानप्रदानतुमपि प्रेरकत्वेन एकं मञ्चप्रदानं कृतम् । मुख्यातिथे: प्रभावशालिना सम्बोधनेन उत्साहेन च सम्पूणोपि महाविद्यालय: प्रेरितः ऊर्जावान् चाभूत । राष्ट्रीय-कैडेट-कोरम् अमृतकालमभिलक्ष्य आधारशिलात्वेन तिष्ठति यः यूनां कर्तव्यपथसारणे, देशभक्तिराष्ट्रभक्तिविकासयोश्च योगदानप्रदातुं आवश्यककौशलै: सह पूर्णव्यक्तित्वेन पुरत आयाति ।

एनसीसी सिद्धांतनामेकीकरणं अमृतकालस्य लक्ष्यै: सह सहजतया संरक्षितो भवति । येन भारतं समृद्धभविष्यं प्रति नेतुं सशक्तकर्तव्यनिष्ठनागरिकानामेका सततनिर्माणप्रक्रिया भवति ।

व्यावसायिकमार्गदर्शनं तथा नियुक्तिकक्षः

छात्राणां व्यावसायिकक्षेत्रेषु प्रवेशात्प्राक् तेषु अपेक्षितानां कौशलानां विकासाय, ससमयं जातानां नवीननीतिनां निर्णयनां च विषये ज्ञानवर्धनार्थं, उच्चशिक्षणविषयकानाम् अवसराणां चयनार्थं च बहूपयोगि दिग्दर्शनं कर्तुम् इन्द्रप्रस्थमहिलामहाविद्यालयस्य व्यावसायिकमार्गदर्शनं तथा नियुक्तिकक्षेण समग्रे वर्षे अनेकेषां कार्यक्रमाणां, कार्यशालानां, परिषदां च आयोजनं कृतम् ।

'Career Trends in India' (भारते आजीविकायाः आयामाः) इति २०२३ इत्यस्य वर्षस्य प्रथमः कार्यक्रमः। अस्मिन् क्षेत्रे दशाधिकवर्षाणि यावत् कृतभूरिपरिश्रमः प्रसिध्दः आजीविकासमुपदेशकः श्री.परवीन मल्होत्रा १५ जनवरी २०२३ तमे दिने आयोजिते विशेषकार्यक्रमे छात्राः सम्बोधितवान्।

३० जनवरी २०२३ तमे दिने आयोजिते **'Careers in Management and its various aspects'** (``व्यवस्थापनक्षेत्रे आजीविकाः, तस्य विविधाः आयामाश्च``) इति शीर्षकस्थायां परिषदि एस्.पी.जैन व्यवस्थापनं तथा संशोधनसंस्थायाः अधिकारिभिः छात्राभ्यः अत्यन्तसहजैः शब्दैः बहुज्ञानवर्धकं मार्गदर्शनं कृतम्।

१५ फरवरी२०२३ तमे दिने आय.सी.ए.ई. संस्थायाः संयुक्ततत्त्वावधानेन Global University Fair (वैश्विकविश्वविद्यालयसम्मेलनम्) समायोजितम्। तत्र विश्वेषु प्रसृतानां बहूनां विश्वविद्यालयाः ५०० पञ्चशताधिकाः पञ्जीकृताः च छात्राः अस्मिन् प्रसङ्गे भागम् अवहन्। अत्र राष्ट्रियस्तरे अन्ताराष्ट्रियस्तरे च उच्चशिक्षणविषयकसम्भावनां विषये छात्राः मार्गदर्शनं प्राप्तवन्तः।

जनवरीतः मार्चमासपर्यन्तं व्यावसायिकमार्गदर्शनं तथा नियुक्तिकक्षेण विशेषव्याख्यानमालायाः आयोजनं कृतम्। अस्याः आरम्भः १३ जनवरी दिने अर्चना गरोडियामहाभागया कृतेन **Careers and Entrepreneurship** इति विषयस्य उद्बोधनेन अभवत्। **Careers in Law** इति विषयकं व्याख्यानं ११ फरवरी दिने आयोजितम्। अत्र विख्यातविधिज्ञाः यथा कु. बाहुली शर्मा, श्री. शिवम् सिंग, श्री. रचित राजन चैते स्वानुभवकथनेन छात्रान् उद्बोधितवन्तः। अस्य अन्तिमव्याख्यानं श्री. जयन्त साहावर्येण (**T.I.M.E. Institute** वरिष्ठमण्डलप्रमुखः) कृतम्। **"Careers in Government Sectors"** इति तस्य व्याख्यानस्य विषयः आसीत्। द्विदिवसीय नियुतिपूर्वसिद्धताविषयकं शिबिरं 8-१० अगस्तदिने आयोजितम्। तत्र १५० छात्राः भागम् अवहन्। १८ अगस्त दिने **'Audit & Analytics'** इति विषयकं व्याख्यानसत्रम् आयोजितम् आसीत्। तत्र आहत्य १०२ छात्राः मार्गदर्शनं प्राप्तवन्तः।

'Career Prospects at RBI of India' इति विषयमाधारीकृत्य एकस्याः कार्याशालायाः आयोजनं ७ दिसंबर दिने अभवत्। तत्र श्री. अंश्वेय कायन्तुरावर्यः **(Head of Budget, Audit and Coordination Cell in HRMD)** राष्ट्रियकोशागारकार्यालयात् उपस्थाय स्वमार्गदर्शनेन छात्राः उपकरोत्।

नियुक्तिपरिणामाः –अस्य वर्षस्य जनवरीमासतः अगस्तमसपर्यन्तं ३० नियुक्तिकार्यक्रमाः आयोजिताः। तत्र ४२ छात्राः नियुक्तिपत्रं प्राप्तवन्तः। तेषु **Posist Technologies, Kline and Company, JLL Business Services, Godrej Properties, MGH Group, Hike Education, Planify, Barclays, Crowe, EXL** इत्यादयः संस्थाः प्रमुखाः।

द्वितीयसत्रम् अगस्तमासे आरब्धम्। तदा अगस्तमासतः दिसंबरमासपर्यन्तम् आहत्य १८ नियुक्तिकार्यक्रमाः आयोजिताः। तत्र ८१ छात्राः सफलतया नियुक्तिपत्रं प्राप्तवन्तः। तेषु **Deloitte, KPMG, D.E. Shaw, Future First, RSA Group, Wise FinServ, WTW, SAP Labs, SSSi, EY Global Delivery Services, Barclays Bank, Siya Consulting, Verizon** तत्र इत्यादयः संस्थाः उल्लेखनीयाः सन्ति। तत्र सामान्यतया ६,८७ इति वार्षिकम् उत्पन्नम् आसीत्। **D.E. Shaw & Co** तत्र इत्यस्यायां संस्थायाम्

अर्थशाशास्त्रविषयस्य माही वोहरानामिकया छात्रया तथा वाणिज्यविभागस्य रिधिमा अरोरानामिकया छात्रया च सर्वाधिकं वार्षिकोत्पन्नं (२३.०५) इति अधिगतम्।

एवं प्रकारेण जनवरीतः दिसंबरमसपर्यन्तं (२०२३) आहत्य ६० संस्थाः महाविद्यालयम् आगत्य छात्राः नियुक्त्यर्थं प्रोत्साहिताः। आहत्य १२३ नियुक्तिपत्राणि अस्मिनवर्षे सफलतया छात्राभ्यः प्राप्तानि। तत्र सामान्यतया वार्षिकोत्पन्नं ६.८७ इति सर्वाधिकं वार्षिकोत्पन्नं च २३.०५ इति च आसीत्।

अनेन विभागेण सफलतया बहुचर्चितस्य व्यक्त्यध्ययनस्पर्धायाः **HSBC India Business Case Program, Bain & Company's BRAINWARS and Deloitte's Graduate School Maverick Season 7** आयोजनं कृतम्। तेषु मुस्कान सिंह,अनन्या तलवारः, दिव्यांशी त्यागी, मानसी गोलछा इति चतसृणां छात्राणां चमू उपान्त्यस्पर्धां यावत् स्वकौशलं दर्शैतवती।

समानावसरकक्षः

स्वतन्त्रतायाः अमृतमहोत्सवसमारोहस्यैकांशे "समावेशीविकास:- शैक्षणिकसंस्थानेषु विविधतायाः सशक्तिकरणम्" इति विषयानुसारं स्वीकृतम् - 'ए शॉर्ट फिल्म ऑन इनक्लूसिव एजुकेशन' इति नामकस्य लघुचलचित्रस्य ऑनलाइनप्रदर्शनम् '१२ अगस्त २०१३' दिनांके ०२:०० वादने आयोजितम्। 'गूगल मीट' इत्यत्र अयं विचार: 'समावेशीविकासस्य' व्यापकविषयेन प्रेरितः आसीत्। वृत्तचित्रे ऑटिज्म-विकारेण पीड़ितः छात्रः दर्शितः, यो बाल: एकस्मिन् शैक्षणिकसंस्थाने प्रवेशं वाञ्छति। चलचित्रमिदं प्रकाशयति यत् जीवने काठिन्ये सत्यपि समावेशीशिक्षा कस्यचित् जीवनं परिवर्तितुं शक्नोति, अथ च आत्मविश्वासस्य कारणं भवति। छात्रै: कक्षायां संस्थागतस्थानेषु च धारणानिर्माणे समावेशितायाः च वर्धापने स्वकीया: विचाराः व्यक्ता:। "डॉ. देशराजः मीना संयोजक: - समावसरप्रकल्पः [EOC], सुश्री ज्योतिसिंह, सदस्या - [EOC], सुश्री गार्गी-सरकारः सदस्या -[EOC] तथा च सुश्री शबनमफिरदौस सदस्या -[EOC]" एते वृत्तचित्रस्य प्रासंगिकतायां तथा च समावेशितां वर्धापयितुं करणीयेषु उपायेषु स्वविचारान् व्यक्तवन्तः। छात्रान् च समावेशितायाः वातावरणनिर्मातुं प्रेरितवन्तः। अस्मिन् कार्यक्रमे विभिन्नविषयाणां संकायसदस्या: छात्राश्च भागं गृहीतवन्तः। कार्यक्रमस्य समापनम् ईदृशं व्यवहारिकं कार्यक्रमं कर्तुं प्रोत्साहनार्थं महाविद्यालयस्य प्रधानाचार्यया पूनमकुमरियामहोदयया धन्यवानज्ञापनद्वारा कृतम्।

EOC द्वारा ज्ञानवर्धिनीं संगोष्ठीम् आयोजितुं " बडी 4 स्टडी" इत्येतेन भारतस्य ज्येष्ठतमेन छात्रवृत्तिमंचेन सह सहयोगेन कृतम्। २६ सितंबर २०२३तमे दिनांके प्रातः ११:३० वादनात् मध्याह्न १२:३० वादनपर्यन्तं महाविद्यालयस्य 'एवी व्याख्यानकक्षे' आयोजितोऽयं कार्यक्रम: "रिलायंस फाउंडेशन अंडरग्रेजुएट स्कॉलरशिप २०२३-२४" विषयेऽस्मिन् केन्द्रितः आसीत्। सुश्री शिफ़ारिज़वी, राष्ट्रीयप्रबन्धक: तथा च श्रीमनोजकुमार: सहायकप्रबन्धक: "बडी ४ स्टडी" आभ्यां शैक्षणिकवर्षाय २०२३-२४ इत्यस्य कृते रिलायंस फाउंडेशन अंडरग्रेजुएट छात्रवृतेः विषये प्रत्येकस्य पाठ्यक्रमस्य प्रथमवर्षस्य छात्रान् अवबोध: कारित: मार्गदर्शनं च कृतः। अनेन सहयोगेन एकस्य सूचनात्मकस्य सत्रस्य सुविधा प्रदत्ता येन छात्रैः छात्रवृत्ते: अनुप्रयोगाणां विषये ज्ञानं प्राप्तम्। येन समेषां छात्राणां कृते समावसरस्य वर्धापनार्थं समावसरप्रकल्पस्य प्रतिबद्धता प्रतिबिंबिता।

राष्ट्रीयएकतादिवसस्य कार्यक्रमाय ३१ अक्टूबर २०२३ इति दिनांके 'ऐक्यम्' इत्यस्य आयोजनं कृतम् ।' ऐक्यम्' यस्थार्थ:-एकता। भारतस्य सांस्कृतिक कुट्टिभचित्रं तस्य च विविधतायाः शक्तेः उल्लेखनीय उत्सव आसीत् । कार्यक्रमस्यास्य उद्देश्यं छात्रेषु एकताया. विकास: आमीत् । तासाभिनवपरम्पराणां, भाषाणां कलारूपाणां च आयोजनं स्यात् तै: भारतं समृद्धं भवति ।

कार्यक्रमेऽस्मिन् विभिन्ना: गतिविधयः आसन् याः दिवसस्य उत्सवानुरूपमासन् । दिनस्यारम्भ: सामूहिकभ्रमणेनारभत्। छात्राः राजकीयवस्त्राण्यधरन्, भारतीयसंस्कृतेः विविधतां तथा च जनानामेकतां प्रदर्शयन्तः सर्वे एकतया अचलन्, क्षणमिदं मनोहारी आसीत् । भ्रमणमिदं संगठनस्य पारस्परिकसम्मानस्य च प्रतीकात्मकः संकेतः आसीत् ।

'भारतस्य सांस्कृतिकी प्रस्तरचित्रकला' विषयेऽस्मिन् 'चित्रनिर्माणप्रतियोगिता' आयोजितासीत् । छात्रै: चित्रमाध्ययेन भारतस्य विभिन्नसंस्कृतिषु निहिताया एकताया: प्रदर्शनं कृतम् । पश्चाच्च चित्राण्येतानि पुस्तकालयस्य 'एकतावीथ्यां' प्रदर्शितानि । चित्राणां लक्ष्यं भारतीयैकताया: दृढीकरणमासीत् |

यदा छात्रा: राजकीय वस्त्राणि धृत्वा एकत्रीभूय नृत्याय उत्साहिता: तदा महाविद्यालयस्यालिन्दः नृत्यभवनमिव संवृत्तः। विविधपृष्ठभूमेः छात्रा: यदा एकस्मिन् स्वरे नर्तितवन्तः तदा कार्यक्रमोऽयं जीवनसंगीतेन आनन्देन चापूरयत्। पाश्चात्यैः भारतीयैश्च नृत्यसमितिभिः 'फ्लैश मॉब' नृत्येन दर्शका: मुग्धा:। अत्र नृत्यरूपाणां विविधता प्रदर्शिता।

कार्यक्रमस्य भागरूपेणायोजितायां मेहंदीप्रतियोगितायां छात्रा: रचनात्मकताया: कलात्मकतायाश्च प्रदर्शनमकुर्वन् इच्छुकाश्च प्रतिभागिन जटिलमेहंदीरचनामपि कृतवन्तः । छात्रा: भोजननिर्माणमपि कृतवन्तः, यत्र प्रत्येकमपि छात्रेण गर्वेण स्वराज्यस्य प्रतिनिधित्वं कृतम्। छात्रा: 'लाकिंग' इत्यतः 'ब्राउनी' तथा च गोलगप्पा इत्यतः दालचूरमापर्यन्तं क्षेत्रीयव्यञ्जनानि प्रास्तुवन्। छात्रैः स्वास्थ्यवर्धकं स्वादिष्टञ्च भोजनं विनिर्मितम् । समानावसरविभागेन आयोजितः 'ऐक्यम्' कार्यक्रमः सफलतमः आसीत्। अस्य कार्यक्रमस्य सफलतायै छात्रैः स्वयंसेवकै: आयोजकैश्च समर्पणं महानुद्योगश्च कृतः । कार्यक्रमोऽयं विविधतायामेकताया: सुन्दरं उदाहरणमासीत्। कार्यक्रमोऽयं भारतस्य सांस्कृतिकप्रस्तरचित्रकार्याः उल्लेखनीयोत्सवस्य रूपेण स्मरिष्यते।

सक्षमताकक्षः

इन्द्रप्रस्थमहिलामहाविद्यालयेन विशेषावश्यकतावतां छात्राणाम् आवश्यकता: पूरणाय ' सक्षमप्रकल्पः' इत्यस्य स्थापना कृतास्ति। महाविद्यालयेन शैक्षणिकवर्ष-2023- 24 इत्यस्मिन् 22 विकलाङ्गछात्रेभ्यः प्रवेशः दत्तः। शैक्षणिकवर्ष-2023-24 इत्यस्य वर्त्तमाने दृष्टिबाधितानां 38 छात्राणाम् एकेन असर्वकारीय-संघटनेन ' हेल्प द ब्लाइंड फाउंडेशन ' इत्यनेन छात्रवृत्तिप्रदानाय चयनं कृतम् ।

सक्षमप्रकल्पः इत्यनेन जनवरी - दिसम्बर 2023 इत्यस्य वर्त्तमाने विभिन्नकार्यक्रमाणाम् आयोजनं कृतम् ।

1 फरवरी 2023 इत्यस्मिन् विकलाङ्गछात्राणां कृते 'सामर्थ्यम्' वार्षिकस्य अन्तरमहाविद्यालयीयोत्सवस्य 2023तमस्य आरम्भः कृतः। सामर्थ्योत्सवस्य उद्घाटनं प्राचार्यवर्यया प्रो.पूनमकुमरियामहाभागया कृतम् । मुख्यातिथिः

प्रो.कुसुमलतामलिकः, दिल्लीविश्वविद्यालयस्य हिन्दीविभागे आचार्यास्ति सा " साहित्य विकलांगता एवं समाज: एकः संवादः" इति विषये व्याख्यानं दातुम् आमंत्रितासीत् यच्च बहु ज्ञानवर्धकम् आसीत्। समर्थोत्सवस्य एकभागरूपे सक्षमनिर्माणम् अन्तरमहाविद्यालयीयप्रतियोगिता: अपि आयोजिता: - एक्सटेम्पोरप्रतियोगिता, गायनप्रतियोगिता खेलप्रतियोगिताश्च । दिल्लीविश्वविद्यालयस्य विभिन्नमहाविद्यालयानाम् शताधिकैः दिव्यांगछात्रैः भाग: गृहीतः उक्तप्रतियोगितासु भागः गृहीतः तथा च विजेतृणां पुरस्कारैः सह प्रमाणपत्रैः सम्मानं कृतम् । मार्च2023 वर्त्तमाने 21 मार्च 2023 इत्यस्मिन् विश्वडाउन-सिंड्रोमदिवसं मानायितुं छात्रैः संकायसदस्यैश्च पीतरागस्य परिधानं धृतम्। प्रतिभागिभिः सोत्साहं सोशलमीडियामध्ये चित्राणि प्रसारितानि।समावसरप्रकल्पमाधयमेन 28 अप्रैल 2023 दिनांके छात्राणां कृते दीक्षान्तस्य आयोजनं कृतम्। प्रथमवर्षस्य छात्रैः द्वितीयवर्षस्य स्नातकैः स्ववरिष्ठानां कृते सांस्कृतिकप्रदर्शनं प्रस्तुतम्। प्राचार्यया प्रो.पूनम कुमरियावर्यया शैक्षणिकवर्षे 2022-2023 इत्यस्मिन् RISE पाठ्यक्रमस्य सफलतापूर्वकं पूर्णकतृभ्यः छात्रेभ्यः शैक्षणिकवर्ष 2022 इत्यस्मिन् च कंप्यूटरकौशलप्रशिक्षणपाठ्यक्रमपूर्णकर्तृभ्यः छात्रेभ्यः प्रमाणपत्राणि वितीर्णानि ।

नवशैक्षणिकवर्षस्य आरम्भं सूचयितुं , 31 अगस्त 2023 इत्यस्मिन् नवच्छात्राणां कृते एकः अभिविन्यासकार्यक्रमः आयोजित: आसीत् । यूरोपीयसंघस्य समन्वयकेन सदस्यैश्च स्वपरिचय: दत्तः, दिव्यांगछात्राणां कृते च उपलब्धमूलभूत आधारविशेषसुविधा इतिविषये एका विस्तृता प्रस्तुति: प्रदत्ता। महाविद्यालये प्रवेशः नीतः . नूतनसत्ररूपे, 1 सितंबर 2023 इत्यतः 21 सितंबर 2023 इति यावत् पञ्चदशदिवसीय गतिशीलता अभिविन्यासकार्यक्रम: आयोजित: आसीत्। प्रमाणितगतिशीलता प्रशिक्षकेण श्री अनिलकुमारेण दृश्यविकलांगछात्राः महाविद्यालयपरिसरस्य आभ्यन्तरे परितश्च दृश्यांकनं कर्तुं प्रशिक्षिताः कृताः। संगठनम् 'हेल्प द ब्लाइंड फाउंडेशन' इत्यनेन 26 सितंबर 2023 इत्यस्मिन् महाविद्यालयस्य पञ्च छात्रेभ्यः 'स्मार्ट विजन ग्लास' अपि वितीर्णम्। सर्वे प्राप्तकर्तारः एसवीजी इत्यस्य उपयोगितया कार्यप्रणाल्या च परिचिताः आसन्। एक: महत्वपूर्णदिवसः, अंतर्राष्ट्रीय श्वेतयष्टिसुरक्षादिवस:, 18 अक्टूबर 2023 इत्यस्मिन् मानितः । 'हेल्प द ब्लाइंड फाउंडेशन' इत्यस्य सुश्री ज्योत्या श्री अश्वांगेन च उन्मुखीकरणम् निर्माणम् च कृतम्। श्वेतवेत्रस्य उपयोगिता -प्रासंगिकताविषये जागरणं, श्वेतवेत्रजागरूकता मार्च इत्यस्य आयोजनं कृतम्।

प्रायः द्विशताधिकछात्राणां संकायसदस्यानां च दायित्वेन सह महाविद्यालयपरिसर: प्राचार्यया प्रो.पूनमकुमरियावर्यया श्वेतवेत्रयात्रायां भागग्रहणाय अत्यन्तम् उन्मुखी आसीत्।

प्राचार्यया प्रो.पूनमकुमरियावर्यया मैत्रीसमाजस्य स्वयंसेवकेभ्यः प्रमाणपत्रमपि वितीर्णम् । वर्ष-2023तमस्य एकमन्यत् महत्वपूर्णं दिनं, अंतर्राष्ट्रीय-व्यक्ति-दिवसेन सह समाप्तम् अभवत् ।

गांधी-अध्ययन-मण्डलम्

इन्द्रप्रस्थमहिलामहाविद्यालयस्य गान्धी-अध्ययन-मण्डलम् अस्मिन् सम्पूर्णे शैक्षणिकवर्षे विभिन्नेषु कार्यक्रमेषु गतिविधिषु च सक्रियतया संलग्नः अवर्त्तत। अनेन माध्यमेन च छात्रासु सांस्कृतिकसंवर्धने, जागरूकतामानेतुं , सामुदायिकेषु कार्यक्रमेषु प्रतिभागितायां योगदानं कुर्वत् अस्ति।

गान्धी-अध्ययन-मण्डलेन जनवरी मासे गांधी-स्मृति-संग्रहालयस्य शैक्षणिकभ्रमणे राजनीतिविज्ञानविभागस्य सहयोगं कृतवान्। २८ जनवरी २०२३तमे आयोजिते अस्मिन् शैक्षणिकभ्रमणावसरे छात्राः ऐतिहासिके बिडलाभवने महात्मागांधिनः जीवनदर्शनस्य साक्षात्कारं कृतवन्तः।

अगस्तमासे ७ दिनांके राष्ट्रीय-हथकरघा-दिवसमभिलक्ष्य महोत्सवः आचरितः। अत्र मण्डलेन गूगलमीटमाध्यमेन एकस्य पुरस्कृतस्य वृत्तचित्रस्य प्रदर्दशनमायोजितम्। अत्र अस्य निर्देशकेन श्रीराघवेन्द्र गंजीमहाभागेन सह चर्चासत्रमपि आयोजितम्। अस्मिन् प्रदर्शने ७३ छात्राभिः प्रतिभागः विहितः।

स्वतन्त्रतायाः अमृतमहोत्सवमभिलक्ष्य आयोजितेषु कार्यक्रमेषु गान्धी-अध्ययन-मण्डलेनापि हिन्दी-वाद-विवाद-समित्याः सहयोगेन अगस्तमासे ११ दिनांके 'आत्मनिर्भर भारत और गांधी मार्ग' इति विषयमधिकृत्य अन्तःमहाविद्यालयीया 'एकस्मै एका कला' इति भावात्मिका प्रतियोगिता आयोजिता। अस्यां प्रतियोगितायां २१ छात्राः भागं गृहीतवन्तः।

सितम्बरमासे भारतीयपरिधानानां विशेषतः खादी-हथकरघा इत्यादीनां प्रचाराय प्रसाराय च 'अपना ताना बाना' इति श्रृंखलायाः प्रदर्शनं कृतवन्तः। समायोजितेषु कार्यक्रमेषु एका अन्तर्जालमाध्यमेन आयोजिता उद्घोषलेखनप्रतियोगिता, मुखचित्रकलाप्रतियोगिता, फलकचित्रकलाप्रतियोगिता, अन्तर्जालीया वृत्तचलचित्रनिर्माणप्रतियोगिता, वृत्तचित्रस्य प्रदर्दशनम् इत्यादयः कार्यक्रमाः आयोजिताः। सर्वत्रैव गतिविधिषु छात्राणां सहभागिता प्रशंसनीया आसीत् । कार्यक्रमेषु च भारतीयानां खादीत्यादीनां सांस्कृतिकम् ऐतिहासिकं च प्रदर्शनम् अभवत् ।

अक्टूबरमासस्य प्रारम्भे २-३ दिनांकयोः 'लूम से आलमारी तक; खादी' इति विषयमधिकृत्य अन्तर्जालमाध्यमेन स्थानाधिग्रहणगतिविधिः आयोजितः । अस्मिन् प्रायः ५५ छात्राभिः, शिक्षकैः, शिक्षणेतरकर्मचारिभिश्च प्रतिभागिता विहिता। अनेन सहैव महात्मागान्धिनः १५४तमा जयन्ती आयोजिता। यस्मिन् ३ दिनांके एकः सद्यःप्रकट-खादी-आपणः, अथ च 'एकस्मै एका कला' इति भावात्मकं सत्रं च आयोजितम् ।

एवमस्मिन् शैक्षणिके वर्षे समायोजितैः कार्यक्रमैः इन्द्रप्रस्थमहिलामहाविद्यालये सांस्कृतिकनिधिं प्रति, परम्पराः प्रति, सामुदायिकं योगक्षेमं मैत्रीभावं च प्रति प्रेरणाय गान्धी-अध्ययन-मण्डलस्य प्रतिबद्धतां प्रदर्शयन्ति ।

शैक्षिक: सांस्कृतिक - अनुबन्ध:

अ. `अनन्ता` - विज्ञानसभा

दिल्लीविश्वविद्यालयस्य इन्द्रप्रस्थमहिलामहाविद्यालयस्य विज्ञानसमाजेन ३१ जनवरी २०२३तमे दिनांके 'ब्लाकचेन क्रिप्टोकरेंसी' इति विषयमाधृत्य एका कार्यशाला आयोजिता । यस्यां कार्यशालायां सुरक्षितादानप्रदानविषय सूचना सम्प्रेषणे तीव्रतानयनविषये विस्तृतचर्चा संजाता। वक्तृभिः वीडियोमाध्यमेन बिटकाइनविषये दर्शका: विस्तरेण

संबोधिता:। तत्र च क्रिप्टोकरेंसीशंबन्धिताः समस्याः तासां समाधानानि च प्रस्तुतानि । जिज्ञासुभिः जनवरीमासस्य २८तमे दिनांके 'श्रम आपणस्य' आयोजनं विहितम् तत्र च छात्राणां भाविजीवने शिक्षायाः प्रासंगिकता, व्यावसायिकक्षमतोन्नयनविषये वर्णनमभवत् ।

महाविद्यालयस्य भूगोलविभागेन स्वच्छपर्यावरणविषयमाद्धृत्य 'पर्यावरणस्वास्थ्यम्' इति विषये मानवस्वास्थ्यकल्याणाय कार्यशाला आयोजिता । महाविद्यालयीयसमाजेन फरवरीमासस्य २७ दिनांके "राष्ट्रियविज्ञानदिवसस्य" उपलक्ष्ये द्विदिवसीयः कार्यक्रमः आयोजितः । अस्मिन् वर्षे विज्ञानप्रौद्योगिकीमंत्रालयेन राष्ट्रियविज्ञानदिवसस्य विषय: "वैश्विक कल्याणाय वैश्विकविज्ञानम्" इति निर्धारितः आसीत्। पर्यावरणसंबध्देषु विषयेषु शोधपत्राण्यापि प्रस्तुतान्यभवन् । शोधपत्रस्य प्रस्तुतेः पश्चात् प्रश्नोत्तरी अपि आयोजिता।

द्वितीये दिवसे प्राचार्यया प्रो. पूनमकुमरियामहोदयया विज्ञानविभागस्य पत्रिकायाः विमोचनं विहितम् । प्राचार्यया कथितं यत विज्ञानं पृथक्विषयरूपेण मन्यते परन्तु प्रतिविषयं विज्ञानमावश्यकं भवति । एतदनन्तरं चित्रकर्षणप्रतियोगिता आयोजिता। यस्याः विषयः आसीत् - कार्यस्थिरता । अस्यां प्रतियोगितायामनेके महाविद्यालया: भागमगृह्णन् । एतस्य पश्चात् 'स्वास्थ्ये प्रौद्योगिकी इति विषयमाधृत्य चर्चासत्रमायोजितम् ।

अप्रैलमासस्य ८तमे दिनांके विज्ञापनस्ता ‘आपणीकरणस्य मनोविज्ञानम् तथा उपभोक्ताव्यवहारः’ इति विषयिका स्नातककक्षाभि: सह एका संगोष्ठी आचरिता ।अस्यां ब्रांड अवगमनस्य मूल्यांकनस्य, चयनस्य विषये विस्तृतचर्चा अभवत् । विभिन्नविभागानां कतिपयछात्रैः परियोजनास्वपि कार्यं कृतम्, येषां विवरणं निम्नलिखितमस्ति -

कृतिका रोहिल्ला तथा उज्जयिनी कशिश छात्राभ्याम् अल्ट्रासोनिक सेंसस्य उपयोगं कृत्वा एका रडारव्यवस्था निर्मिता । या च आब्जेक्ट डिटेक्शन तथा दुरीमापनाय अल्पमूल्यात्मकमनुकूलं च योग्यं च समाधानं प्रददाति ।

कृतिका रोहिल्ला इति छात्रया' मोर्स कोड ट्रांसलेटर" इति नामकमपि संयंत्रं विकसितम्। येन माध्यमेन टेक्स्ट इति मोर्स कोर्ड परिवर्तनरूपे परिवर्तितुं शक्यते ।

सिमरनवशिष्ठ इति छात्रया "जलस्तरमापनम्" इति विषयमाद्धृत्य कार्यं कृतम् । यस्योद्देश्यं जलस्तरस्य निरीक्षणसंरक्षणादिकं च वर्तते । सिमरन छात्रया "उन्नतं चालकोपनेत्रम्" इति आविष्कृतम्, यत् दुर्घटनानां संभावनामल्पीकर्तुं, चालकेभ्यः वास्तविकसमयस्य सूचनाप्रदानाय सेंसरतंत्रम् इत्यादिकीम् उन्नतप्रौद्योगिक्या उपयोगं करोति ।

गौरीसक्सेना इतिच्छात्रया धूम्रस्य शीघ्रज्ञानाय, यथासमयनिष्कासनाय, अलार्मतंत्रमुपयुज्य एकं "धूम्रमापकम्" इति यंत्रमाविष्कृतम् । गौरी सक्सेना तथा सादगीतिवारी इति छात्राभ्यामेकं ‘अग्निमापकम्' इति यन्त्रमपि आविष्कृतम् । यत् ज्वालायाः तीव्रतायाः पश्चादपि विभिन्नवातावरणे विद्यमानं अग्नेः व्यवस्थितज्ञानाय यथासमयप्रशमनाय सूचनां प्रददाति । साक्षी सिमरनवशिष्ठाभ्यां " क्लैप डिटेक्शन समं ध्वनिनिरीक्षणप्रणाली विकसिता या करतालनिनाद इति विशिष्टध्वनिज्ञाने समर्था अस्ति ।

आशिमाराठौडप्राचीमिश्राभ्यां वैकल्पिककृषिरूपे हाइड्रोपोनिककृषेः विचार: विकसितः । गौरीसक्सेना छात्रया विभिन्नासु औद्योगिकप्रक्रियासु वायोः हानिकारकधूम्रस्य निष्कासनाय धूम्रस्य अवशोषकं विकसितम् ।

मनोविज्ञानस्य छात्रेण सान्निध्यशर्मणा विभिन्न-औद्योगिकप्रक्रियाया: समये वायोः हानिकारकधूम्रस्य धूमकणानां च निष्कासनाय स्तूप-परिक्षणम्" इति प्रस्तावः प्रस्तुतः ।

रियासिंहः इति छात्रया क्षमाया: नम्रतायाश्च प्रदर्शनाय लक्ष्यं विकसितम् । किं वर्तमानसमयेऽपि छात्रेभ्य: समानसंबन्धाः विद्यमानाः सन्ति। यदि सन्ति तर्हि तेषां सामर्थ्यं दिशश्च का: सन्ति ?

संगणकविज्ञानस्य छात्राभ्यां आरिकानिंगयौजम. भाविकाश्रीवास्तवाभ्यां जलाशयेषु नदीषु समुद्रतटेषु विद्यमानस्य जलीयवृक्षाणां कूटकस्य एकत्रीकरणाय जलशोधननौका इति विकसिता। तथा एतत् शस्यानां संचयनप्रणाल्याः कार्यान्वयनं कर्तुं शक्नोति। तथा सर्वेभ्य उच्चगुणात्मकस्य सीलिंग इति उपकरणस्य उपयोग: क्रियते।

साक्षी छात्रया ' इंजन नॉन-फंक्शनिंग व्यवस्थया समं 'मदिरास्तरमापकम्' इति यन्त्रं विकसितम्।

शांभवीशीतलाभ्यां स्वचालितस्य 'जेब्रा क्रांसिग' इति प्रस्तावः प्रस्तुतः, यत् यातायातसंकेतस्य रक्ते सति भ्रमति, यस्मिन् पदातयः यात्रिणः मार्गस्य पारं गन्तुं शक्नुवन्ति तथा यानानि तत्र गमनाय अवरोधयति।

आ. पाठ्येतरगतिविधयः

रचनात्मकतायाः उत्साहस्य च सर्वेषु क्षेत्रेषु प्रसरिताः पाठ्येतरगतिविधयः समाजस्यैका विस्तृता श्रृंखला । नृत्यवादविवादसंगीतनाटकचलचित्रप्रश्नोत्तरीनाट्यकलाः च युवप्रतिभानां पोषणं कुर्वन्ति तथा च उत्कृष्टतायै मार्गं प्रददति । सहैव महाविद्यालये जीवनं गतिशीलं प्राणयुक्तमानन्दमयं च निर्मान्ति। एतद्वर्षे पूर्ववदेव महाविद्यालयस्य प्रबलसामर्थ्येन सह ईसीए दलस्य कृते कतिपयानिप्रमुखानि अद्भुतानि च क्षणानि आनीतवान्। अस्मभ्यं वर्षस्यारम्भे आन्तर्महाविद्यालयीयायाः 'लोक-आर्केस्ट्रा' इति संगीतप्रतियोगितायाः प्रथमसंस्करणस्य आयोजनाय संस्कृतिपरिषदा दिल्लीविश्वविद्यालयेन सह सहयोगकरणस्य प्रतिष्ठितः अवसरः लब्धः । इन्द्रप्रस्थमहाविद्यालयेन न तु केवलं स्वसंगठनात्मककौशलेन विश्वविद्यालयसमुदायः प्रभावितः अपितु मनमोहकेन 'जेंग बिहू' प्रदर्शनेन सह प्रथमपुरस्कारोऽपि विजितः । वर्षे संस्कृतिपरिषदा भारतीयसांस्कृतिकसंबन्धपरिषदा च सह (आई. सी. सी. आर.) अधिकः सहयोगः कृतः । अस्य वर्षस्य समाप्तौ अत्यन्तं सफलरूपेण अकादमिकसांस्कृतिकभोगस्य आयोजनं दक्षिणकोरियादेशस्य भारतस्य च सफलमैत्र्याः पञ्चाशत्वर्षसम्पूर्त्यवसरे दिल्लीविश्वविद्यालयस्य सहयोगेन जातः । एतद्द्वयोः दिवसयोः बौद्धिककलात्मकयोः आदानप्रदानस्य एका टेपेस्ट्री आसीत्। प्रत्येकेन ईसीए समुदायेन स्वस्वरचनात्मकक्षेत्रेषु अपि उत्कृष्टप्रदर्शनं कृतम्।

अभिव्यक्तेः, नाट्यविषयकसमुदायस्य वर्षं रचनात्मकमुत्पादकं चासीत्। समुदायेन वर्षस्यारम्भः नूतनसदस्यानां कृते गहनप्रशिक्षणाय आवश्यकेषु कौशलेषु ध्यानकेन्द्रितार्थं नाटकीयकलायाः सहभागितायाः बोधनेन सह कृतः। दलेन दिल्लीविश्वविद्यालये तथा च अन्येषु प्रतिष्ठितसंस्थानेषु प्रदर्शनकार्यक्रमेषु प्रशंसा प्राप्ता। येषु सर्वेभ्यः प्रतिष्ठिते शेक्सपियर समुदायेन, जाकिरहुसैनमहाविद्यालयेन दिल्लीविश्वविद्यालयेन च आयोजिताषु प्रतियोगिताषु राष्ट्रीयनाटकप्रतियोगितायां सर्वश्रेष्टनाटकस्य पुरस्कारः चासीत् । अंतर्विश्वविद्यालयस्य च उत्सवकला ड्रामेटिवससमुदायेन बहुसक्रियतायुक्तमासीत । यस्मिन् महाविद्यालयेन मंचसज्जायामेकः पुरस्कारः प्राप्तः तथा च नाटक- -श्रेण्यां नव पुरस्काराः प्राप्ताः । अभिव्यक्त्या महाविद्यालये लोकप्रियारट्रीटाले 'प्रतियोगिता चौराहा २०२३' इत्यस्य नेतृत्वं सफलतापूर्वकं कृतम्। येन विश्वविद्यालयस्य

सर्वेभ्यः प्रतिभाशालिनः समूहाः आकर्षिताः। दलस्य मुख्यमाकर्षणं पर्यावरणस्य वनस्य जलवायुपरिवर्तनमंत्रलायस्य च तत्वावधाने विविधतायामेकता वायुप्रदूषणस्य च भरो तेषां विशेषरूपेण प्रदर्शनमासीत्।

अफरोजावेस्टर्न नृत्यसमुदायेन वर्षस्यारम्भे पूर्णस्मिन्विश्वविद्यालये अंतर्विश्वविद्यालयस्य उत्सवकाले उत्साही प्रतियोगिरुपेणकृता। दलेन दिल्लीविश्वविद्यालयस्थे शहीदभगतसिंहमहाविद्यालये आयोजितायां ‘नृत्यरुलेट’ प्रतियोगितायां प्रथमपुरस्कारेण सह पञ्चप्रतियोगितासु शीर्षपुरस्काराः विजिताः।

वार्षिकोत्सवे '**श्रुति 2023**` अङ्गरुपेण स्वपाश्चात्यसामूहिकीनृत्यप्रतियोगिता ‘व्हैकिफीट' सफलतापूर्वकमायोजिता। यत्र पञ्चदश विद्यालयैः प्रदर्शनं कृतम् तथा रोमांचकपुरस्काराः तैः विजिताः। समूहः विद्यालयसमुदायान् मंत्रमुग्धान् कर्तुं न कदाप्यसफलतां गतः। तत् च स्वोत्यादनेन सहस्यात् वा विशिष्टावसरेषु 'फ्लैश भाव' वा नृत्यदिनर्चया सह भवेत्, यथा स्वतंत्रतायाः अमृतमहोत्सवः वा भवेत्। विश्वविद्यालयमिव महाविद्यालयेन समावसरप्रकल्पः (ईओसी) द्वारा आयोजितः ‘ऐक्यम्’ एकतादिवसः २०२३।

`**आलापः**, भारतीयसंगीतसंस्थाविद्यालयस्य रागः अस्ति। २०२३ वर्षे महाविद्यालये आयोज्यमाने प्रत्येकस्मिन् विशिष्टावसरे शुभारंभः दिल्लीविश्वविद्यालयस्य कुलगीतेन तथा सरस्वतीवन्दनया सह भविष्यति। अलापस्य प्रदर्शनं बहुप्रतीक्षितः प्रशंसार्हः च भवति। सः राष्ट्रीय - दिवसानां समारोहेषु स्यात् वा छात्राणां स्व 'फ्रेशर’ इत्येतेषां स्वागतसौप्रस्थानिकेषु दिवसेषु स्यात्। प्रभावयुतं अनुशासनं स्वशिक्षया सह च संस्था महाविद्यालयस्य अमुल्यप्रशंसायाः एकत्रीकरणे सक्षमा सञ्जाता। ‘आलापः’ विश्वविद्यालयसंगीतसर्किट इत्यस्मिन् शास्ति। अनया वर्षिकमहाविद्यालयोत्सवे ‘निनाद २०२३’ इत्यत्र सफलतापूर्वकं प्रतिभागः कृतः। संस्था 2023 इत्यस्य मुख्यविन्दुः इन्द्रप्रस्थमहाविद्यालयस्य सहयोगेन संस्कृतिपरिषदः दिल्ली विश्वविद्यालयेन च आयोजितायां प्रथमायां ‘इन्टर- फॉलेज लोक ऑर्केस्ट्रा संगीत प्रतियोगितायां’ ‘जेंग विहू’ प्रदर्शनेन सह प्रथमपुरस्कार प्राप्तः।

२०२३ वर्षे **क्रॉयडन**, फाइन आर्टस संस्था स्वसदस्यानां रचनात्मकतायाः निरन्तरं वृद्धौ संलग्ना विभिन्नाषु अंतरमहाविद्यालीय-अन्तरविश्वविद्यालयीयप्रतियोगितासु च महाविद्यालयस्य समाजस्य प्रतिनिधित्वमकरोत्। संस्थया विभिन्न माध्यमेन कलानाञ्च शैलीनां विषये ज्ञानसंवर्धनाय स्वसदस्यानां कृते विभिन्नानि आर्ट अन्तर्गतं सत्राण्यायोजितानि। विद्यालये कॉंगडन समेषां विशिष्टावसरसमारोहाणां च सौन्दर्यशास्त्रं 'ग्लैमर’ इत्यस्य मस्तिष्कं शक्तिश्चास्ति। अस्य विशेषता केवलं आयोजनस्थलानि अलंकर्तुम् नास्ति अपितु प्राप्तसंस्थाधनानां सततोपयोगाय कुशलयोजनाकार्यान्वयने चाप्यस्ति। कॉयडन इत्यस्य प्रदर्शिनी विक्रीस्टॉल इत्यादिकं च अत्यधिक सफलतामवाप्राप्नोत्। तच्च संस्थायाः सदस्यैः निर्मितवस्तूनां कृते वा 'फेस पेन्टिंग स्टाल' वा तेषां 'सेल्फी प्वांइट' इत्यर्थम्। संस्था ‘अमृतकलशयात्रा’, आर्द्रभूमि-पुनर्स्थापनम्, जागरूकतादिवसः, एकतादिवसः भारतस्य जी२० इत्यस्य अध्यक्षता इत्यादिभिः सह आप अन्यमहत्वपूर्णावसराणां सफलायोजनाय महाविद्यालये अन्याभिः काचित् संस्थाभिः कार्य संगठनैस्सह सहयोगमकरोत्। ‘आर्ट आफ वॉक’ इत्यर्थम् आईआईटी देहल्याः ‘फाइन आर्ट्स’ संस्थया सह संस्थायाः सहयोगः महाविद्यालयपरिसराद् पृथक् सह-शिक्षायाम् एकः उपयोगार्हः अभ्यासः आसीत्।

एरुडाइट - प्राश्निकसंस्था स्व पञ्चशतादूर्ध्वं सदस्यान् प्रश्नकलायां सम्मेलनाय सततं प्रयासरता वर्त्तते । अत्र दिल्लीप्रौद्योगिकीविश्वविद्यालयः , भारतीयप्रौद्योगिकीसंस्थानम् , देहली , लेडीश्रीराममहाविद्यालयः, मिरांडाहाउसमहाविद्यालयः हंसराजमहाविद्यालयः किरोड़ीमलमहाविद्यालय - सदृशैः कतिपयै: शैक्षणिकसंस्थानैः सहभागिता गृहीता। संस्थया स्वसदस्यान् वाद-विवादकौशलैः वादविवादयोश्च विभिन्नैः प्रारूपैः परिचाययितुं सहायतार्थं नियमितानि प्रशिक्षणसत्राणि (आनलाइन - ऑफलाइन उभयथा) आयोजितानि।

एतानि सत्राणि समाजस्य वरिष्ठसदस्यैः सहैव वाद-विवादयोः सार्व- जनिकभाषणक्षेत्रस्य च विशेषज्ञैः आयोजितानि आसन् । अस्याः प्रायः त्रिशत् सदस्यानामावर्षं देहलीवादविवादसमूहे उल्लेखनीया सहभागिता आसीत् । **लार्कैंडेंजा**, वेस्टर्नम्यूजिकसंस्थया संगीतप्रतिभायाः एकस्य च जीवत् - संगीतसमुदायस्य वर्धापने नैरन्तर्यमाचरितम् । संस्थया 30/1/2023 दिनांके बलिदानदिवसस्मरणोत्सवे स्मरणं कृतम् । तत्र संस्थया कार्यक्रमद्वयमायोजितम् । 1.आईपीसीडब्ल्यूडब्ल्यू वार्षिकोत्सवः 'श्रुति 2023' इत्यन्तर्गतम् एकलगायनप्रतियोगिता 2. एरियेटा - रैप्सोडी, गीतवादनप्रतियोगिता। वेस्टर्नम्यूजिकसंस्थायाः सदस्यै: दिल्लीविश्वविद्यालयस्य महाविद्यालयेषु विभिन्नासु प्रतियोगितासु सक्रियरूपेण भागः गृहीतः तथा व्यापकमंचे स्वीयप्रतिभायाः प्रदर्शनं कृतं तथा च समुदायसहयोगस्य वर्धापनं कृतम्। 2023 वेस्टर्नम्यूजिकसंस्थायाः प्रयासः उत्कृष्टतया रचनात्मकतया संगीतसंवर्धनाय च चिह्निता:।

मृदंग भारतीयनृत्यसंस्था एकः समावेशीमंच: विद्यते। यः विभिन्ननृत्यरूपाणामभ्यासं प्रचारं च कृत्वा भारतस्य सांस्कृतिकविविधतायाः उत्सवं कामयमानः अस्ति । वर्षस्य प्रारम्भः प्रतिभाशाली सुश्री शिखाशर्मणः, मनमोहककथकप्रदर्शनेन सह अभवत् तथा सर्वदैव मृदंगस्य प्रदर्शनेन अस्मिन् कार्यक्रमे अधिकेनाकर्षकता समागता। अस्य वर्षस्य प्रारम्भे महाविद्यालयस्य निरीक्षणं कुर्वाणो यूएसआईईएफ इत्यस्य फुलब्राइट स्कॉलर्स इति विशिष्टप्रतिभायुतैच्छात्रै: चर्चासत्रे मृदंगेन भारतीयशास्त्रीयफ्यूजननृत्येन सह दर्शकाः मंत्रमुग्धाः कृता: । मृदंगेन वार्षिकमहाविद्यालयमहोत्सवस्य भागस्य रूपे अंतरमहाविद्यालयलोकनृत्यप्रतियोगितायाः तथा अस्य नृत्यस्य अतीव प्रशंसा विहिता।

महाविद्यालये तथा अन्यत्र स्थानेषु मृदंगस्य प्रदर्शनेन न केवलम् महाविद्यालयः अपितु सर्वे प्रसन्नाः कृताः, तथा कथक-भरतनाट्यम-मोहिनीअट्टम-ओडिशा-सत्त्रिया-कोल्लाटम-गरबा-कालबेलियामाइला विशेषतायुक्तस्य भारतस्य सांस्कृतिकनिधिभूतानि नृत्यानि बहुरूपदर्शकान, अपि सुन्दरतया प्रदर्शितानि । इंद्रप्रस्थमहिलामहाविद्यालयस्य हिंदीवादविवाद समित्याः 'सम्वाद 2023' तमे विभिन्नकार्यक्रमाणां कार्यशालानां च आयोजनं कृतं यस्य उद्देश्यं छात्रासु बौध्दिकतार्किकक्षमतायाः विकासः इति साधु आयोजनमासीत् । समितिसदस्यैः अनेकासु अंतरमहाविद्यालय-राष्ट्रीयस्तरस्यवादविवादप्रतियोगितासु अस्माकम् इन्द्रप्रस्थमहाविद्यालयस्य प्रतिनिधित्वं कुर्वद्भिः अनेके पुरस्काराः गृहीता: । वर्ष 2023 इत्यस्य प्रारम्भे विविधानां कार्यशालानां श्रृंखला अभवत्।

2023 तमस्य वर्षस्यारभः अनेककार्यशालानां शृङ्खलाभिः अभवत् यत्र समित्या सदस्येन महाविद्यालयस्य प्राध्यापकेन डॉ राजेशकुमारवर्येण सह दर्शनशास्त्रस्य मूलमवगतम् । तत: फरवरीमासे समितेः वरिष्ठसदस्या संसदीयवादविवादकार्यशालाम् आयोज्य अन्यछात्रान् वाक्शैल्याः प्रस्तुतीकरणनियमैश्च परिचायितवन्त:। एतस्मिन् क्रमे एव साम्यवादस्य राष्ट्रवादस्य च संकल्पनास्वपि एका अन्यतमा कार्यशाला समायोजिताभवत् । मार्चमासे महाविद्यालयस्य

वार्षिकोत्सवः पारंपरिकवाद- विवादप्रतियोगिताया आयोजनं कृतम् । अत्र दिल्लीविश्वविद्यालयस्य प्रायः पञ्चविंशति छात्रैः भागः गृहीतः । "सम्वाद"इत्यनेन अगस्तमासे महाविद्यालयस्य "गांधी-अध्ययनमण्डललेन सह संयुज्य एका आभासीया (ऑनलाइन) अंतःमहाविद्यालयीयवादविवादप्रतियोगिता (JAM) आयोजिता । एतस्मिन्नेव क्रमे सितम्बरमासे `दिनकरजयन्तीम्` उपलक्ष्य एका आभासीया अन्तर्महाविद्यालयभाषणप्रतियोगिता "वसुधैव कुटुम्बकम्' इति विषयमाधृत्य आयोजिता। यस्या उद्देश्यं छात्राणां कुटुम्बस्य साधुः अभिप्रायबोधः इत्यासीत् । काले समित्या आनलाइन -आफलाइन माध्यमैः सप्ताहे पञ्चदिनानि यावत् दैनिकसत्राण्यपि आयोजितानि।एतेषु सत्रेषु पारम्परिकवादविवादन्यायालयः, आशुभाषणम्, भाषणम्, समूहचर्चा, संसदीयवादविवाद: इत्यादीनाम् अभ्यासः अभवत् । दैनिकसत्राणामुद्देश्यं "समितेः सदस्यानाम् अन्तर्महाविद्यालयप्रतियोगितार्थं सज्जीकरणम् " इत्यासीत् ।

समितेः सदस्यैः अस्मिन् वर्षे वादविवाद सम्बध्दासु परश्शतासु प्रतियोगितासु भागः गृहीत. अथ च "सर्वश्रेष्ठदलम्" 'सर्वश्रेष्ठवक्ता' 'सर्वश्रेष्ठप्रश्नकर्ता' इत्यादिसदृशान् अनेकान् पुरस्कारान् प्राप्य समितेः स्वमहाविद्यालयस्य च यशोवर्धनं कृतम् ।

सिमुलैक्रा , महाविद्यालयस्य चलचित्रादिकलासंस्था तेषां छात्राणां कृते एकः मन्चः अस्ति ये चलचित्रं (सिनमा) चित्रकलां(फोटोग्राफी) च प्रति उत्साहिनः सन्ति । समित्या वरिष्ठैः प्रतिभायुतैः समर्पितैश्च सदस्यैः महाविद्यालयस्य सर्वेषां महत्वपूर्णक्षणानां वार्णिकसङ्कलनं (दस्तावेजीकरण) कृतम् । महाविद्यालयमहोत्सवः इत्यत्र आयोजिता "श्रेष्ठ 23" सर्वासु श्रेणीषु एका महती सफलता आसीत् भवतु नाम सा तत्कालचित्रकारिता (ऑन द स्पाट फोटोग्राफी) अथवा तत्कालैककलायां चित्रनिर्माणम् (ऑन द स्पाट वन मिनट फिल्मनिमण) अथा कॉसप्ले प्रतियोगिता भवतु सिमुलका इत्यस्य चलच्चित्रदलेन चित्रदलेन (फोटोग्राफी टीम) च कतिपयासु अन्तर्महाविद्यालयप्रतियोगितासु भागः गृहीतः प्रशंसा च प्राप्ता । येषु महाविद्यालयेषु किरोड़ीमलमहाविद्यालयः, श्रीवेंकटेश्वरमहाविद्यालयः, श्रीरामवाणिज्यमहाविद्यालयः, महाराजाअग्रसेनमहाविद्यालयः अथ च IIT कानपुर इति संस्थाः सम्मिलिताः सन्ति । समाजाय सर्वाधिकं सुखदक्षणानि आसन् - "मेरी माटी मेरा देश " इतिस्मृता आसप्ताहम् प्रचलितं चलचित्रप्रर्दशनम् । यस्य विषय: वीराणां वन्दनं : नमनं चासीत्, वीरसैनिकेभ्यः प्रणामांजलि वितरति स्म। आमध्याह्नं परिपूरितै: स्थानैः सह अयं महोत्सवः सर्वथाः सफलः अभवत् ।

क्रीडा

इन्द्रप्रस्थमहिलामहाविद्यालयस्य शारीरिकशिक्षाविभागेन महाविद्यालयस्य छात्राणां कृते शतरंजप्रतियोगिताया: आयोजनमकारि। इदमायोजनम् ३ फरवरी प्रभृति ४ फरवरी २०२३ महाविद्यालयस्य सम्मेलनकक्षे आयोजितमभवत् । अस्यां प्रतियोगितायां विविधेभ्यः विभागेभ्यः 54 छात्राभि: पंजीकरणं कारितम् यासु 36 छात्राभिश्च भाग: गृहीतः । 7 चक्राणामियं कीडा अभवत् यस्मिन् प्रथमस्तरे प्रथमं स्थानं बी.कॉम. मानसी (हितीयवर्षतः) प्रचेता अग्रवालः चासीत् । चक्रस्य नाम सद्यः बहिः (नॉक आउट राउंड) आसीत। तदनन्तरं समाजशास्त्रविभागस्य (द्वितीयवर्षस्य छात्रायै)

मान्यादीप्तमाय द्वितीयस्थानम् अथ च बी.कॉम. आनर्स (प्रथमवर्षतः) अनन्याजैसलाय तृतीयं स्थानं गतम् । दिल्लीविश्वविद्यालयक्रीडापरिषदः, दिल्लीविश्वविद्यालयस्प तत्वावधाने इन्द्रप्रस्थमहिलामहाविद्यालयस्य शारीरिकशिक्षाविभागेन 06-02- 2023 तः 09-02-2023 पर्यंतं नेटबॉलप्रतियोगितायाः(महिला) 2022-2023 आयोजनमकारि । क्रीडायां 15 प्रतिष्ठितानां महिलामहाविद्यालयानां महनीया उपस्थितिः आसीत् तथा दिल्लीविश्वविद्यालयतः सम्बध्दैः शताधिकैः नेटबॉलक्रीडकैः भागः गृहीतः । क्रीडा: महाविद्यालयस्य शीर्षस्थे बाह्यस्थिते प्रांगणे सद्यः बहिः (नॉक आउट) आधारआधृत्य क्रीडिता:।

इन्द्रप्रस्थमहिलामहाविद्यालयस्य शारीरिकशिक्षाविभागेन एकान्तरविभागीया क्रिकेटक्रीडा आयोजिता । प्रतियोगिताम् 21 विभागानां 14 समूहैः पंजीकरणं कृतम्। छात्राणां प्रतिभागिता 350 - 400 यावदासीत् । विभागतः एकस्मादधिकमपि समूहस्य पंजीकरणाय अवकाशः(अनुमतिः) आसीत् ।

एकस्मिन् समूहे (क्रीडादले) 10 क्रीडकाः आसन् । विभिन्न-विभागानां मध्ये सरोमाञ्चा क्रीडा अभवन् ।अन्तिमा क्रीडा (फाइनल) समाजशास्त्रविभाग - इतिहासविभागयोश्च मध्ये अभवत् ।यस्यां समाजशास्त्रविभागः नवांकैः विजितः उभेऽपि क्रीडादले प्रोःपूनमकुमरियामहोदयया अथ च शारीरिकशिक्षाविभागस्य प्रभारीशिक्षिकया डा. सीमासिंहमहोदयद्वारा पुरस्कारेण (ट्रॉफी) सम्मानिते अभवताम्। इन्द्रप्रस्थमहिलामहाविद्यालयस्य शारीरिकशिक्षाविभागेन नारीत्व- मासस्य उत्सवं मानितुम् 24 मार्च 2023 तमे दिनांके तिसृसु तिस्रः इति बास्केटबॉलप्रतियोगितायाः आयोजनं व्यधायि । तत्र दिनातिथिः अन्ताराष्ट्रीयबास्केटबॉलक्रीडिकायाः पुत्री विद्या रामनारायणः आसीत ।अयं कार्यक्रमः समेषां विद्यालय-महाविद्यालयानां कृते आसीत । क्रीडायै 44 दलै: पञ्जीकरणं कारितम्। प्रतियोगितायां भागं ग्रहीतुं त एव अर्हाः आसन् येषां जन्म 2007: अथवा ततः प्राक् अभवत् ।अस्मिन् कार्यक्रमे विभिधेभ्यः विद्यालयेभ्यो महाविद्यालयेभ्यश्च प्रतिभागिता अभूत । शीर्षेभ्य: ३ दलेभ्यः पुरस्कारराशिः तथा ट्रॉफी, सर्वेभ्यश्च भागग्रहीतृभ्य: प्रमाणपत्रं वितरितम्। इन्द्रप्रस्थमहिलामहाविद्यालयस्य शारीरिकशिक्षाविभागेन वार्षिकोत्सवं श्रुतिमभिलक्ष्य 27 मार्च 2023तमे दिनांके शूटिंग प्रतियोगितापि आयोजिता। प्रतियोगितायै पुरुष-महिला वर्गतः 18 पञ्जीकरणमभवत् वास्केटबालस्य शूटिंगकृते प्रतिभागिभ्य: एककलात्मकः समयः दतः । उभयोः श्रेण्यो: शीर्षेभ्यः त्रिभ्य: क्रीडकेभ्य: विजयोपहारः प्रमाणपत्रं च प्रदत्तम् ।

मेडिटेशन शब्दस्योत्पत्तिः लैटिनभाषायाः शब्दात् 'मेडिटेटम" इत्यस्मादभवत् । अस्यार्थ अस्ति चिन्तनम् । अधिकांशतः जनानामत्र सम्मतिः यत् ध्यानाभ्यासेन वयं जागरुका: भवाम: तथा जानीमः यत् अस्माकं विचाराः भावनाभि: व्यवहारेण च सह कथं संयुक्ताः सन्ति । ध्यानमेका प्राचीना भारतीया पद्धतिरस्ति । यस्योत्पत्तिः सहस्रैः वर्षैः प्राक् भारते अभवत् । ध्यानं मनसः शान्त्यै मौनं स्थित्वा गहनचिन्तनाभ्यास : एव अस्ति । इयं योगस्य अथवा श्वासप्रश्वासै: गहनपद्धतिरस्ति। अस्याभ्यासेन मनस: निश्चला शान्तिपूर्णा च स्थिति: अवाप्तुं शक्यते । ध्यानमवसादं निमीलयति, सकारात्मकान् विचारान जागरुकतां च वर्धयति। एतदतिरिच्य मनुष्यः ध्यानमाध्यमेन जीवनस्य तनावपूर्णानुभवै उत्पन्नां समस्यां दूरीकर्तुम् आभ्यन्तरीं च शान्तिमानेतुं ध्यानं भजते ।

योग: भारतस्य प्राचीना आध्यात्मिकी पद्धतिरस्ति । यस्मिन् श्वासनिग्रह: शारीरिकव्यायाम: ध्यानस्याभ्यासः क्रियते । योगस्याभ्यासः मनसि दिव्यान् भावान् स्थापयितुं क्रियते । अस्मिन् आसनानि विविधाः मुद्राश्चान्तर्भवन्ति । योगशब्दस्य

संस्कृते अर्थः भवति 'मेलनम्" । केचित् योगे गतिशीलध्यानमानन्ति, यत्र आसनानि कृत्वा स्वमनसि शान्तिः जागरुकता चोत्पाद्यते । ध्यानमपि योगस्याङ्गमेव अस्ति । योगस्यैव ध्यानमपि चेतनाया उच्चावस्था प्राप्तुं मानसिकं सम्बन्यस्थापनं करोति । व्यायामं प्रकृत्य ब्रह्माण्डेन सह प्रशिक्षितुं तथा ध्यानस्य अभ्यासः जागरुकता मानसिकरुपेण भावनात्मकरूपेण च शान्तिपूर्णां स्थितिं चावाप्तुं क्रियते । अस्याभ्यासमाध्यमेन एव सम्भवति । यत्र कस्मिंश्चित् वस्तुनि विचारेण चराचरगतिविधौ मनःकेन्द्रीतं कर्तुमभ्यासः क्रियते । इयं ध्यानपरम्परा अस्माकं धार्मिकपरम्परा स्वीक्रियते अभ्यस्यते च ।

इन्द्रप्रस्थमहिलामहाविद्यालयस्य शारीरिकशिक्षाविभागेन आइक्यूएसी इत्यस्य तत्वावधाने सेंटर फार योग एण्ड वेल बींइग इत्यस्य सहयोगेन ध्यानविषयिकी एका कार्यशाला आयोजिता। अस्य कार्यक्रमस्य संचालनं ठा. अजयशास्त्रिणा व्यधायि। यः योगविशेषज्ञः जवाहरलालनेहरुविश्वविद्यालये सहायकाचार्यः अस्ति। अयं कार्यक्रमः 24 अप्रैल 2023तमे दिनांके महाविद्यालस्य सभागारे आयोजितः । अस्यां कार्यशालायां 265 छात्रा : उपस्थिताः आसन् । डा. अजयमहाभागेन योगस्य ध्यानस्य च गहना व्याख्या विहिता। तेन ध्यानप्रक्रियायां स्वास्थ्यस्य अनेकाः पध्दतयः प्रदर्शिताः । अजयशास्त्री योगस्य ध्यानस्य या गहना व्याख्या विहिता छात्रैश्चापि तत्पालनं विहितम् । पश्चात् सः जीवने योगस्य ज्ञानप्रदायिनी महिमा इति विवृणुतवान् । अन्ते ध्यानस्य विषये प्रश्नोत्तरात्मकं सत्रमारब्धम् । भाषणानां कार्यशालायाः उदेश्यं छात्रेषु स्वप्राचीनयोगपरम्परां प्रति जागराणं प्रेरणं चासीत। कार्यशालायां ध्यानस्य लाभानां विषये ज्ञानप्रदानं तथायं कथं मानसिकानां शारीरिकानां च रोगाणां प्रशमनं करोतीति ज्ञापितम् । एवंप्रकारेण अयं कार्यक्रमः तथा च अन्ये कार्यक्रमाः छात्राणाम् उत्साहेन उपस्थित्या च अस्मिन् शैक्षणिकवर्षे सफलतापूर्वकं सम्पन्नाः।

सेवानिवृत्ताः

अस्मिन् वर्षे सुश्री. नलिनी पण्डामहोदया 28.02.2023 दिनाङ्के, **सुश्री. सुषमा नीनाकुमारीमहोदया च** 30.06.2023 दिनाङ्के **वाणिज्यविभागात् सेवया निवृत्ते ।**

शिक्षकेतरकर्मचारिषु श्री. नरेनः सिंहमहोदयः 31.03.2023 दिनाङ्के, **छात्रावासात् सेवया निवृत्तिं प्राप्तवान् ।**

श्रद्धाञ्जलिः

अत्यन्तं दुःखावहं यत् अस्मिन् वर्षे महाविद्यालयपरिवारस्य अनेके सदस्याः दिवङ्गताः । तेषु **श्री. सुशीलभारद्वाजवर्यः**, **सुश्री. सुन्दरीसिद्धार्थवर्या**, **सुश्री.सुषमा प्रियदर्शिनी, श्री. विजयः वाधवा, सुश्री. अनिता स्वामीवर्या** चैते प्राध्यापकाः अवर्तन्त ।

शिक्षकेतरकर्मचारिषु **श्री. टि. एस. राजन्महोदयः** दिवङ्गतः । महाविद्यालयपरिवारः सर्वान् अपि आत्मीयान् सदस्यान् प्रति श्रद्धासुमनांसि अर्पययति ।